चामरम्--शशाङ्ककरसङ्काशहिमडिण्डिमपाण्डुर ! प्रोत्सारयाशु दुरितं चामरामरवल्लभ ! ॥

प्रदक्षिणा--यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ॥

नमस्कारः--नमः शुभ्रांशवे तुभ्यं द्विजराजाय ते नमः। रोहिणीपतये तुभ्यं लक्ष्मीभ्रात्रे नमोऽस्तु ते ॥

अर्घ्यमन्त्रः--ॐ विद्ये विद्यामालिनि चन्द्रिणि चन्द्रमुखि स्वाहा ॥

पुनरर्घ्यम्--क्षीरोदार्णवसम्भूत अत्रिनेत्र समुद्भव ! गृहाणार्घ्यं मया दत्तं पूर्णचन्द्र ! नमोऽस्तु ते ॥
ज्योत्स्नायाः पतये तुभ्यं नमस्ते ज्योतिषांपते। नमस्ते रोहिणीकान्त अर्घ्यं मे प्रतिगृह्यताम् ॥

स्तुतिः--नमोऽस्त्वमृतरूपाय परमामृतवर्षिणे। जगतां जीवभूताय जीवदात्रे नमोऽस्तु ते ॥
जगत्-स्रष्ट्रे जगत्-पात्रे जगत्संहृतिकारिणे। शिवरूपाय शान्ताय मृत्युरोगविनाशिने ॥
नमस्तेऽस्तु निशानाथ ! रोहिणीप्रियवल्लभ ! नमस्ते हररूपाय कलाषोडशधारिणे ! ॥
त्वं व्रतं चरतामेवं वरदः सर्वदेहिनाम्। रोग-मृत्यु-महोत्पात-ग्रहशान्तिं कुरुष्व नः ॥
ग्रहनक्षत्रभेदं च तथा वै सार्वकालिकम्। तत्सर्वं कुरुताच्छान्तिं ताराधिप ! नमोऽस्तु ते ॥

क्षमापनम्-न्यूनातिरिक्तकर्माणि मया यानि कृतानि च। क्षमस्व तानि सर्वाणि ताराधिप नमोऽस्तु ते॥

मन्त्रहीनं क्रियाहीनं विधिहीनं सुरोत्तम! यत्पूजितं मया देव परिपूर्णं नमोऽस्तु ते॥

पूजां समाप्य दक्षिणां दद्यात्—ॐ अद्येत्यादि कृतैतच्चन्द्रपूजाकर्मणः साङ्गतासिध्यर्थमिमां दक्षिणां सुवर्णं यथानाम गोत्राय इत्यादि॥ ततोऽभिषेकः॥ आशीर्मन्त्रपाठः॥

विसर्जनम्—देवाधिदेव देवोऽसि पूजितोऽसि मया प्रभो! गच्छ देव वरं स्थानं यत्र नक्षत्रसंहतिः॥

इत्यग्निपुराणोक्तपूर्णिमायां चन्द्रपूजाविधिः समाप्ता॥

★

अक्षयतृतीया-पूजाविधिः

सङ्कल्पः—ॐ अद्येत्यादि अमुकगोत्रस्याऽमुकशर्मणो मम नानाभोगोत्तराक्षयविष्णुलोकवासकामनया एतैर्यथामिलितोपचारैर्दीप-कलश-गणेशपूजनपूर्वकं विष्णुपूजनमहं करिष्ये।

दीप-कलश गणेशं सम्पूज्य। ॐ विष्णोरराटमिति षोडशोपचारैः विष्णुं च सम्पूजयेत्॥ कुम्भदानम्—

ॐ साम्बोदककुम्भाय नमः इति कुम्भं सम्पूज्य। दानीयब्राह्मणं त्रिः सम्पूज्य॥ वारिणा देहमभ्युक्ष्य। मम नाना भोगोत्तराक्षयविष्णुलोकवासकामनया इदं जलपूर्णं साम्बं धर्मघटं विष्णुदैवतं यथानामगोत्रायेत्यादि दत्वा।

प्रार्थना—एष धर्मघटो दत्तो ब्रह्म-विष्णु-शिवात्मकः। अस्य प्रदानात् सकला मम सन्तु मनोरथाः॥

दानप्रतिष्ठा—अद्य कृतैतत्साम्बोदककुम्भदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय दानप्रतिष्ठात्वेन०॥

छत्रदानम्—मम यमपथाधिकरणक-तीक्ष्णातपनिवारणार्थमिदं छत्रमुत्तानाङ्गिरादैवतं यथानामगोत्राय०॥

सर्वेषामेव देवानां छत्रमातपवारणम्। सुखदं मोक्षदं यस्मादतः शान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा-कृतैतच्छत्रदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ॥

उपानद्दानम्—मम यमपथाधिकरणदुर्गभूसन्तरणार्थं तप्तबालुकासिकण्टकातपभूसन्तरणार्थमिमे उपानही उत्तानाङ्घ्रिरो दैवते यथानामगोत्राय तुभ्यमहं सम्प्रददे ॥

उपानही प्रदास्यामि कण्टकादि निवारणम्। सर्वस्थानेषु सुखदमतः शान्तिं प्रयच्छतु ॥

दानप्रतिष्ठा—ॐ अद्य कृतैतदुपानद्दानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय दानप्रतिष्ठात्वेन० ॥

यष्टिदानम्—मम नेत्रहीनत्व-पंगुत्व-दुर्बलत्वादिविनाशद्वारा सुखेन मार्गगमनार्थं दुष्टभयनिवारणार्थमिमां यष्टिं वनस्पतिदैवतं यथानामगोत्राय तुभ्यमहं सम्प्रददे ॥

यतिभ्यो वैष्णवं दण्डं द्विजेभ्योऽपि खनित्रकम्। प्रदाय परलोकेऽसौ यमदण्डं न गच्छति ॥

प्रददाति यथावर्णं यो दण्डं ब्रह्मचारिणे। स महापुरुषो लोके ब्रह्मचर्यं समश्नुते ॥

दानप्रतिष्ठा-अद्य कृतैतद् यष्टिदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय दानप्रतिष्ठात्वेन तुभ्य० ॥

सक्तुदानम्—मम आकल्पतृप्तिकामनया एतान् सक्तून् प्रजापतिदैवतान् यथानामगोत्राय तुभ्यमहं०।

वैशाखशुक्लपक्षस्य तृतीयायां च धीमता। गोभूरत्नहिरण्यादि तत्र दत्वाऽक्षयो भवेत् ॥

दानप्रतिष्ठा-अद्य कृतैतत् सक्तुदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं यथानामगोत्राय दानप्रतिष्ठात्वेन तुभ्य० ॥
सर्वत्र दाने दक्षिणापर्यन्तं कर्त्तव्यम् ॥ देवीपुराणे वारिघटदाने विशेषः—ॐ मम अत्र रोहिणी नक्षत्रयुक्त वैशाखशुक्लतृतीयायां युगादौ अक्षयब्रह्मलोककामनया शर्करा-कर्पूरादियुक्तमुदककुम्भं वरुण-दैवतं यथानाम गोत्राय तुभ्यमहं सम्प्रददे ॥

एष धर्मघटो दत्तो ब्रह्म-विष्णु-शिवात्मकः । अस्य प्रदानात्सफला मम सन्तु मनोरथाः ॥

अद्य कृतैतच्छर्कराकर्पूरादि युक्तोदककुम्भदानप्रतिष्ठासांगतासिद्ध्यर्थं यथानामगोत्राय० ॥
वैशाखे नित्यघटदाने—अद्य मम बहुवर्षोपस्थितविविधभोगकामनया शर्कराकर्पूरादियुतं जलपूर्णघटं विष्णुदैवतं यथानामगोत्राय तुभ्यमहं सम्प्रददे ॥ व्यजनदानं कृत्वा कर्म समापयेत् ॥

इत्यक्षयतृतीयाविधिः ॥

★

कर्कटसंक्रान्तौ प्रदोष-कण्डारक पूजाविधिः

प्रयोगः—उपलेपनादि संशोधिते गृहाङ्गणे कर्ता हस्तपादादि शुद्धिं विधायाचम्य कुश-तिल-यव-जलान्यादाय देश-कालौ स्मृत्वा ॐ ममाद्य लूताद्यष्टभयनिवारणार्थं कर्कटसंक्रान्तौ प्रदोषे कण्डारकपूजनमहं करिष्ये सङ्कल्पं कुर्यात् ॥ ततो गोमयोपलिप्ते पाषाणोपरि ॐ भूर्भुवः स्वः कण्डारक निशाचरेहागच्छेत्यक्षतैरावाह्यैतानि पाद्यार्घ्याचमनीय-स्नानीय-पुनराचमनीयानि कण्डारकाय नमः इदमनुलेपनमेतेऽक्षताः एतानि पुष्पा णिइदं धूपं दीपं खोचिकानैवेद्यं द्रव्यं पूगीफलं तत्कालोद्भवफलं कण्डारकाय नमः सम्पूजयेत् ॥ ततः [1]शरलेन्धनदीपान् दद्यात्—

कण्डारकसुराधीश गृहाण दीपमुत्तमम् । शरलेन्धनसम्भूतं ममारिष्टं विनाशय ॥

[2]उल्काप्रक्षेपणम्-कण्डारक रात्रिचर लूतादि भयनाशन । उल्कामिमां प्रक्षिपामि मास्तु लूताभयं मम ॥

ततः शिष्टाः सप्त व्रीहीन् विकिरन्ति । ततो दक्षिणां दद्यात् ॥ इति कर्कटसंक्रान्तौ प्रदोषे कण्डारकपूजा समाप्ता ॥

कृत्यसंग्रहे—प्रदोषसमये राजन् कर्कसंक्रमणे रवौ । प्रतिवर्षं पूजनीयः कण्डारक निशाचरः ॥ लूतादिभ्यो भयं नास्ति तथारिष्टभयापनुत् । शरलेन्धनदीपाश्च दातव्या उल्कया सह ॥ फलानि च प्रदेयानि तत्काले सम्भवानि च । माषपिण्डमयं देयं नैवेद्यं खोचिकाविधम् ।

१ शरलो देवदारुः । २ उल्कया प्रज्वलया । पट्टवस्त्रोपरि लिखित्वा सन्ध्यायां पूजयेत् ॥

पौष-रविवार व्रत-पूजा

श्रीसूर्याय नमः । आचम्य कर्मपात्रं कृत्वा सङ्कल्पः-ॐ अद्येत्यादि मम समस्तरोगनिवारणार्थमायुष्यादि-सकलकामनासिद्ध्यर्थं श्रीसूर्यनारायणप्रीत्यर्थं रविपूजनं तदङ्गत्वेन च दीप-कलश-गणेश-पूजनमहं करिष्ये ॥ दीप-कलश-गणेशपूजनम् । ताम्रपात्रे रक्तचन्दनेन अष्टदलं लिखित्वा देवं पूजयेत् ।

ध्यानम्--तेजोरूप सहस्रांशु सप्ताश्वरथगं वरम्। द्विभुजं वरदं पद्मलांछनं सर्वकामदम् ॥

आवाहनम्-आगच्छ भगवन् सूर्य मण्डले च स्थिरो भव। यावत् पूजा समाप्येत तावत् त्वं सन्निधो भव॥

आसनम्--हेमासनं महद्दिव्यं नानारत्नविभूषितम्। दत्तं मे गृह्यतां देव ! दिवाकर नमोऽस्तु ते ॥

पाद्यम्—गङ्गाजलं मयानीतं परमं पावनं महत्। पाद्यं गृहाण देवेश ! धामरूप नमोऽस्तु ते ॥

अर्घ्यम्—भो भो सूर्य महद्भूत ब्रह्मविष्णुस्वरूपिणे। अर्घ्यमञ्जलिना दत्तं गृहाण परमेश्वर ! ॥

आचमनीयम्-गङ्गादितीर्थजं तोयं जातिपुष्पेण वासितम्। ताम्रपात्रे स्थितं दिव्यं गृहाणाचमनीयकम् ॥

स्नानम्—जाह्नवीजलमत्यन्तं पवित्रकरणं परम्। स्नानार्थं च मया नीतं स्नानं कुरु जगत्पते ॥
पञ्चामृतम्—पयोदधिघृतं चैव शर्करा मधुसंयुतम्। कृतं मया च स्नपनं प्रीयतां परमेश्वर ॥
स्नानम्—गङ्गा-गोदावरी चैव यमुना च सरस्वती। नर्मदासिन्धुकावेर्यस्ताभ्यः स्नानार्थमाहृतम् ॥
वस्त्रम्—वस्त्रपट्टयुगं देव! सूक्ष्मतन्तुविनिर्मितम्। शुद्धं चैव मया दत्तं गृहाण कमलाकर! ॥
उपवीतम्—नमः कमलहस्ताय विश्वरूपाय ते नमः। उपवीतं मया दत्तं तद्गृहाण दिवाकर! ॥
चन्दनम्—कुंकुमागुरुकस्तूरीसुगन्धश्चन्दनादिभिः। रक्तचन्दनयुक्तं तु गन्धमेतत् प्रगृह्यताम् ॥
पुष्पम्—जपा-कदम्ब-कुसुम-रक्तोत्पलयुतानि च। पुष्पाणि गृह्यतां देव! सर्वकामप्रदो भव ॥
अक्षताः—रक्तचन्दनसंमिश्रा अक्षताश्च सुशोभनाः। मया दत्ता गृहाण त्वं वरदो भव भास्कर! ॥
अङ्गपूजा—ॐ मित्राय नमः पादौ पूजयामि। रवये० जंघे०। सूर्याय० जानुनी०। खगाय० ऊरू०। पूष्णे० गुह्यं०। हिरण्यगर्भाय० कटिं०। मरीचये० नाभिं। आदित्या० जठरं०। सवित्रे० हृदयं०। अर्काय० स्तनौ०। भास्कराय० कण्ठं०। अर्यम्णे० स्कन्धौ०। भास्कराय० हस्तौ।

अहस्कराय० मुखं० । ब्रध्नाय० नासिकां० । जगदेकचक्षुषे० नेत्रे० । सवित्रे० कर्णौ० । त्रिगुणात्मधारिणे नमः ललाटं० । विरञ्चिनारायणशङ्करात्मने० शिरः । तिमिरनाशिने० सर्वाङ्गं पूज० ।

धूपम्—त्रिदशागुग्गुलोद्भूतः कलागुरुसमन्वितः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

दीपम्—कार्पासवर्तिकायुक्तं गोघृतेन समन्वितम् । दीपं गृहाण देवेश ! त्रैलोक्यतिमिरापहम् ॥

नैवेद्यम्—पायसं घृतसंयुक्तं नानापक्वान्नसंयुतम् । नैवेद्यं च मया दत्तं शान्तिं कुरु जगत्पते ! ॥

जलम्—कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥

करोद्वर्तनम्—मलयाचलसम्भूतं कर्पूरेण समन्वितम् । करोद्वर्तनकं चारु गृह्यतां च जगत्पते ! ॥

फलम्—इदं फलं मया देव ! स्थापितं पुरतस्तव । तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥

ताम्बूलम्—एलालवङ्गकर्पूरैः खादिरैश्च सपूगकैः । नागवल्लीदलैर्युक्तं ताम्बूलं प्रतिगृह्यताम् ॥

दक्षिणा—दक्षिणां काञ्चनीं देव स्थापितांश्च तवाग्रतः । गृहाण सुमुखो भूत्वा प्रभाकर नमोऽस्तु ते ॥

नीराजनम्—पञ्चवर्तिसमायुक्तं सर्वमङ्गलदायकम् । नीराजनं गृहाणेदं सर्वसौख्यकरो भव ॥

प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च। विलयं यान्ति तानीह प्रदक्षिणपदे पदे॥

नमस्कारम्—नमः पङ्कजनाभाय नमः पङ्कजधारिणे। नमः पङ्कजनेत्राय भास्कराय नमो नमः॥

वायनम्—तण्डुलैः पूरितं पात्रं हिरण्येन समन्वितम्। रक्तवस्त्रयुगं चैव वायनं ते ददाम्यहम्॥

प्रार्थना—यस्योदयः स्याज्जगतः प्रबोधः यः कर्मसाक्षी भुवनस्य गोप्ता॥
कुष्ठादिकव्याधिविनाशको यः स भास्करो मे दुरितं निहन्यात्॥

ततो ब्राह्मणान् भक्ष्य-भोज्य-दक्षिणादिभिः सन्तोष्य विसर्जयेत्॥

इति पौषमासादित्यवारपूजा समाप्ता।

★

कार्तिक-व्रतोद्यापनविधिः

अथ कार्तिकमासे मासादारभ्य समाप्तिपर्यन्तं कर्तव्यप्रयोगः ॥ तत्रादौ स्नान-सङ्कल्पः—ॐ विष्णुः ३ अद्यह अमुकोऽहं सकलपापक्षयपूर्वकमनोभिलषितकामनासिद्धये श्रीराधादामोदरप्रीतये आश्विनशुक्ले-कादशीमारभ्य हरिबोधिन्येकादशीपर्यन्तस्नानमहं करिष्ये ॥

स्नानमन्त्रौ—कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ! प्राप्त्यर्थं तव देवेश मामुद्धर भवार्णवात् ॥
ध्यात्वाऽहं त्वां च देवेश जलेऽस्मिन् स्नातुमुद्यतः । तव प्रसादात् पापं मे दामोदर ! विनश्यतु ॥

स्नात्वार्घ्यम्-नित्यं नैमित्तिकं कृष्ण ! कार्तिके पापनाशनम् । गृहाणार्घ्यं मया दत्तं राधयासहितो हरिः ॥

प्रार्थना—इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! निर्विघ्नं सिद्धिमायातु दामोदर ! नमोऽस्तु ते ॥

ततः आचम्य शुक्लाम्बरधरं विष्णुमिति सम्प्रार्थ्य—ॐ विष्णुः ३ अद्येह सकलपापक्षयपूर्वकमनोभिलषित कामनावाप्तये अद्यारभ्य समाप्तिपर्यन्तं श्रीराधादामोदरप्रीतये आकाशदीपदानमहं करिष्ये ॥
दामोदराय नभसि तुलायां दोलया सह । प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥

राधादामोदरप्रीत्यै दीपदानं कृता मया। निर्विघ्नं सिद्धिमायातु यावन्मासं समाप्यते।
कार्तिके मासि सम्पूर्णे आकाशे दीपदानतः। अक्षयः सन्ततिर्मेऽस्तु दामोदर नमोऽस्तु ते॥

कार्तिके स्नानमाकाशदीपदानं च मुहूर्तादर्वाक् रात्रिशेषे कुर्वन्ति॥ सन्ध्यायामाकाशदीपदानं तु मुहूर्तादर्वाक् अस्तमिते श्रीसूर्ये सति कुर्वन्ति॥ इति सम्प्रदायः॥ ततो राधादामोदरपूजनं, तुलसीपूजनं च। अर्घं संस्थाप्य॥ भूतोत्सादनादिना नित्यपूजावत् कृत्वा प्राणानायम्य। ॐ विष्णुः ३ अद्येह व्रतसङ्कल्प-सिद्ध्यर्थं कार्तिकस्नानाङ्गतया राधादामोदरयोः पूजनमहं करिष्ये॥ हिमस्पर्शेत्यग्न्युत्तारणपूर्वकं पञ्चामृतैः संस्नाप्य॥ ॐ भूर्भुवः स्वः राधादामोदर इहागच्छेत्यावाह्य॥ 'एतन्त' इति प्रतिष्ठाप्य।

ध्यानम्—दक्षिणाधस्तनकरादारभ्यैतत्प्रदक्षिणम्। शङ्ख-चक्र-गदा-शार्ङ्ग-पद्मैर्दामोदरो भवेत्॥

ततो नाममन्त्रेण आवाहनमासनं, पाद्यं, स्नानं, मधुपर्कं, पञ्चामृतमाचमनं, वस्त्रं, गन्धं, यवान्, पुष्पाणि, दद्यात्॥

अङ्गपूजा—ॐ दामोदराय नमः पादौ पूजयामि। केशवाय० कटिं पू०। नारायणाय० उदरं पूज०। श्रीधराय० बाहू पू०। गोविन्दाय० मुखं पू०। सहस्राक्षाय० नेत्रे पू०। सर्वेश्वराय० ललाटं पू०। विष्णवे० शिरः पू०। दामोदराय० सर्वांगं पूजयामि।

ततो धूपं दीपं नैवेद्यं ताम्बूलं दक्षिणां दत्वा ततो ध्यात्वा ॥ जानुभ्यामवनीं गत्वा सफलं अर्घ्यं दद्यात् ॥

ॐ नमः सहस्रशीर्षाय सहस्राक्षाय ते नमः। नमः सहस्रपादाय पुरुषाय नमोऽस्तु ते ॥
सहस्रनाम्ने देवेश ! प्रसीद त्वं ममाच्युत ! अर्घ्यं गृहाण भगवन् ! सर्व कामप्रदो भव ॥
अक्षया सन्ततिर्मेऽस्तु दामोदर नमोऽस्तु ते ॥

नीराजनं कृत्वा नामभन्त्रेण पुष्पाञ्जलिमेवं प्रत्यहं पूजां कुर्वन् सुकथालापैरन्यस्तोत्रपाठादिभिश्च कार्तिकमासं निगमयेत् ॥ राधादामोदरपूजनं तु सुवर्णमयीं प्रतिमां संस्थाप्य, प्रतिमाऽभावपक्षे तुलस्यामेव पूजयेत् ॥

कार्तिकस्नानाङ्गदीपदान सङ्कल्पः—ॐ विष्णुः ३ अद्येहामुकोऽहं सकलपापक्षयपूर्वकमनोऽभिलषितफलाप्तये राधादामोदरप्रीतये ससुवर्णं दीपदानमहं करिष्ये ॥ ॐ ज्ञानप्रदाय सर्वसौख्यविष्णुदेवताय दीपाय नमः इति दीपं गन्धादिभिः सम्पूज्य ब्राह्मणायार्पयेत् ॥

दीपो दानप्रदो नित्यं देवतानां प्रियः सदा । दानेनास्य भवेत् सौख्यं शान्तिर्मे वांछितं फलम् ॥
सज्योतिगुणपात्रं च दीपं घृतसमन्वितम् । सुखदं चास्य दानेन शान्तिरस्तु सदा मम ॥

कार्तिककृष्णत्रयोदश्यां कृत्यम् ॥ प्रातःकाले काकबलिदानम् ॥ अङ्गणे काकं सम्पूज्य, मत्स्यमांससमन्वितं

भक्तबलिम्-काकोऽसि यमदूतोऽसि वायसोऽसि महामते! इमं बलिं गृहाण त्वं त्रायस्व यमसङ्कटात्॥

तस्यामेव सन्ध्यायां यमदीपदानम्—ॐ विष्णुः ३ मम सपरिवारस्यायुरारोग्यैश्वर्योदयाप्तिपूर्वकाऽपमृत्यु-निवारणाय यमप्रीत्यै दीपदानमहं करिष्ये॥ दीपं प्रज्वाल्य गन्धपुष्पाक्षतमादाय ध्यायेत्—

यमाय पाशहस्ताय महिषारूढाय कृष्णवर्णाय नमः॥

प्रार्थयेत्—मृत्युः पाशधरः कृष्णः कालो दण्डधरो महान्। तुष्टोऽस्तु दीपदानेन त्रयोदश्यां स धर्मराट्॥

मृत्युना पाशदण्डाभ्यां कालेन श्यामयेन च। त्रयोदश्यां दीपदानात् सूर्यजः प्रीयते मम॥

धर्मराज नमस्तुभ्यं भवान्नुद्धरणक्षमः। अज्ञानाज्ज्ञानदोषान्मे क्षमस्व त्वं कृपाकर!॥

ॐ विष्णुः ३ मया यमप्रीतये कृतैतत् दीपदानसांगतासिद्ध्यर्थं इमां दक्षिणां ब्राह्मणाय दास्ये, तत्सन्न मम॥ इति यमदीपदानविधानम्॥

नरकचतुर्दश्यां कृत्यम्॥ ब्रह्मपुराणे, तत्रादौ स्नानम्—ॐ विष्णुः ३ अद्येह मम सकलपापक्षयपूर्वकश्रुति-स्मृतिफलावाप्तये नरकचतुर्दश्यां [1]तैलाभ्यङ्गपूर्वकमलापकर्षणस्नानमहं करिष्ये॥

---

१ तैले लक्ष्मीर्जले गङ्गा दीपावल्यां चतुर्दशी। प्रातःस्नानं तु यः कुर्यात् यमलोकं न पश्यति॥
वासरादौ वसन्तादौ बलि राज्ये तथैव च। तैलाभ्यङ्गमकुर्वाणो रौरवं नरकं व्रजेत्॥

अपामार्गमथो तुम्बीप्रपुन्नागमथापरम्। भ्रामयेत् स्नानमध्ये तु नरकस्य क्षयाय वै॥

सकण्टक सपल्लवापामार्गाञ्छिरसउपरि भ्रामयित्वा धर्मराजस्य नामभिस्तर्पयेत्॥ अपामार्गभ्रमणमन्त्रः—

सीतालोष्टसमायुक्तः सकण्टकदलान्वित। भ्रामये स्नानमध्येऽहं नरकस्य क्षयाय वै॥

जीवत्पितृकैरपि अपसव्येन तर्पणम्—

यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥

तिलतैलेन दीपद्वयं प्रज्वाल्य सम्पूज्य निवेदयेत्—

शुनकौ श्यामशबलौ भ्रातरौ यमसेवकौ। तुष्येतां च चतुर्दश्यां दीपदानेन मृत्युजौ॥

नद्यां प्रवाहयेत्॥ तस्मिन्नेव दिने प्रातःकाले शुने मांसौदनबलिमपि दित्सन्ति स्वाचारात्। इति चतुर्दशी कृत्यम्। अमायां कृत्यम्, तस्यां रात्रौ लक्ष्मीपूजनम्॥ उपोष्य सायंकाले स्नात्वा शुद्धवस्त्रं परिधाय गृहाट्टालिकाङ्गणकोष्ठे गोष्ठे दीपं प्रज्वाल्य पूजास्थानमागत्यार्घ्यादिकं संस्थाप्य प्राणानायम्य सङ्कल्पः—ॐ विष्णुः ३ अद्य अमुकोऽहं मम विविधमनोऽभीष्टफलावाप्तये सुखरात्र्यां यथामिलितोपचारैः श्रीमहालक्ष्म्याः

पूजनमहं करिष्ये । आदौ दीपकलशगणेशादीन् पूजयित्वा कुबेरं पूजयेत्—

सुखरात्र्यां प्रदोषे तु कुबेरं पूजयन्ति वै । धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ॥
भवन्तु त्वत् प्रसादान् मे धनधान्यादिसम्पदः ॥

इन्द्रपूजा—ऐरावतसमारूढो वज्रपाणिः पुरन्दरः । शचीपतिश्च ध्यातव्यो नानाभरणभूषितः ॥-आदित्यपु० ।

प्रार्थना—विचित्रैरावतस्थाय भास्वत्कुलिशपाणये । पौलोम्यालिङ्गितांगाय सहस्राक्षाय ते नमः ॥

श्रीमहालक्ष्मीं स्वर्णप्रतिमां पूजयेत्—ॐ भूर्भुवः स्वरिति प्रतिष्ठाप्य । श्रीसूक्तेन षोडशोपचारैः सम्पूज्य समापयेत् ॥ [1]सुखरात्र्यां प्रार्थना—

ॐ विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे ! महालक्ष्मिर्नमस्तुभ्यं सुखरात्रीं कुरुष्व मे ॥
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् । सुखरात्रीप्रभावेण तन्मे लक्ष्मीर्व्यपोहतु ॥
या रात्रिः सर्वदेवानां देवानां सृष्टिसम्भवा । आख्याता भूतले देवि सुखरात्रि नमोऽस्तु ते ॥

---

१ सुखरात्रिरुपःकाले प्रदीपो ज्वलिताङ्गणे । सर्वान् बन्धून् वधूश्चैव वाचो कुशलयार्चयेत् ॥
प्रदीपबन्धनं कार्यं लक्ष्मीमङ्गलहेतवे । गोरोचनाक्षताश्चैव दद्यादङ्गेषु सर्वतः ॥

नमस्ते सर्वदेवानां वरदासि हरिप्रिये ! या गतिस्त्वत् प्रपन्नानां सा मे भूयात् त्वदर्चनात् ॥

प्रतिपदि कृत्यम्, गोवर्धनपूजा—गोमयस्य गोवर्धनपर्वतं निर्माय नानाविधकुसुम-फल-पल्लव-पोत-हरित-रक्तध्वजाभिरलंकृत्य पूजयेत् ॥ सङ्कल्पः—ॐ विष्णुः ३ अद्येहामुकोऽहं सकलपापक्षयपूर्वक श्रीपरमेश्वरप्रीत्यर्थं गोवर्धन-गोपालपूजनमहं करिष्ये । गोवर्धनमूर्तिं विधाय पञ्चामृतैः स्नाप्य—

आवाहनम्—गोपाल-गोवर्धनौ इहागच्छेतामिह तिष्ठेतां सुप्रतिष्ठितौ वरदौ भवेताम् ।

ध्यानम्—बलिराज्ञो द्वारपालोऽभवोऽनघजगत्पते ! निजवाक्यार्थं सिद्धाय सगोवर्धनगोपते ॥

आवाहनादिषोडशोपचारैः सम्पूज्य, बलरामं नन्दं यशोदां गोपालान् गोपीन् गोकुलं सर्वांश्च पञ्चोपचारैः पूजयेत् ।

पुष्पाञ्जलिः—गोपालमूर्ते विश्वेश शक्रोत्सङ्गविभेदक । गोवर्धनकृतच्छत्रं पूजां मे गृह्यतां प्रभो ! ॥

गोवर्धनधराधार गोकुलत्राणकारक । विष्णुबाहुकृतच्छाया गवां कोटिप्रदो भव ॥

गोपूजनसङ्कल्पः—ॐ विष्णुः ३ अद्येहामुकोऽहं सकलपापक्षयपूर्वकं गोकुलवर्धनार्थं श्रीपरमेश्वरप्रीत्यर्थं सवत्सानां गवां पूजनमहं करिष्ये । तिलतैलयुक्तसैरिकहरिद्रादिभिः शृङ्गाण्यङ्गानि सम्भूष्य, षोडशोपचारैः प्रत्यङ्गानि पूजयेत्—ॐ अग्रपादाभ्यां नमः । आस्याय नमः । शृङ्गाभ्यां नमः । स्कन्धाय

नमः । पृष्ठाय नमः । पुच्छाय नमः । चरमपादाभ्यां नमः । वत्साय नमः ।

प्रार्थना—गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मेऽस्तु इह लोके परत्र च ॥

गोग्रासं दद्यात्-सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः । प्रतिगृह्णन्त्विमं ग्रासं गावस्त्रैलोक्यमातरः ॥

नीराजनम्-लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता । घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥

प्रदक्षिणा—अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः । गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

गोमतीं श्रावयेत्-गावः सुरभयो नित्यं गावो गुग्गुलुबन्धिकाः । गावः प्रतिष्ठा भूतानां गावः सर्वफलप्रदाः ॥

अन्नमेव परं गावो देवानां हविरुत्तमः । पावनं सर्वभूतानां क्षरन्ति च वहन्ति च ॥

हविषा मन्त्रपूतेन तर्पयेदमरान् दिवि । ऋषीणामग्निहोतॄणां गावो होमप्रतिष्ठिताः ॥

सर्वेषामेव देवानां गावः शरणमुत्तमम् । गावः सर्वस्य लोकस्य गावो धन्याः सनाहनाः ॥

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

ब्राह्मणश्चैव गावश्च कुलमेकं द्विधाकृतम् । एकमन्त्राश्च तिष्ठन्ति हविरेकत्र तिष्ठति ॥

गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः । सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा ॥

गावः पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा। गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥
एवं रात्रौ दिवावापि समेषु विषमेषु च। महाभयेषु च नरः कीर्तयन् मुच्यते भयात् ॥
घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः। घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे ॥
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम्। घृतं मे सर्वतश्चापि घृतं मे मनसि स्थितम् ॥
गावो ममाग्रतो नित्यं गावः पृष्ठत एव च। गावो मे सर्वतः सन्तु गवांमध्ये वसाम्यहम् ॥
इत्याचम्य जपन् सायं प्रातश्च पुरुषः सदा। यदह्नि कुरुते पापं तत्सर्वं परिमुच्यते ॥
यं प्रातः कुरुते पापं तस्माच्चापि विमुच्यते ॥ विसर्जनं विधाय ईश्वरार्पणं कुर्यात् ॥

ततो गा वने विसृज्य कुलपालिकां कृत्वा रात्रौ भोजयित्वा गोष्ठे दीपान् प्रज्वाल्य यथासुखेन विहरेत् ॥
गोवर्धनपूजनं[1] च मुख्यगोवर्धनसन्निधौ तस्यैव कार्यं तदसन्निधौ चेत् गोमयेन गोवर्धनाकारं कृत्वा सर्वकार्यं कर्तव्यम् ।

---

१ अस्यां प्रतिपदि षण्मुहूर्तव्यापिनी द्वितीया भवति। तत्र चन्द्रदर्शनदोषात् पूर्वं प्रतिपदि एतत् कर्म कार्यम्।
गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमा। सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा ॥—पुराणसमुच्चयः।
अन्यच्च—प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम्। परविद्धां च यः कुर्यात् पुत्रदारधनक्षयः ॥ —देवलः

[1]बलिपूजनविधानम्—बलिं पिङ्गलवर्णसूत्रेण सपरिवारं पराभयकरं शालायां संलिख्य सूर्यायार्घ्यं दत्वा भूतोत्सादनादि नित्यपूजावत् कृत्वा पुनरर्घ्यं संस्थाप्य प्राणानायम्य सङ्कल्पः—ॐ विष्णुः ३ अद्येहामुकोऽहं संवत्सरावच्छिन्नसुखकामः सपरिवारस्य बलेः पूजनमहं करिष्ये ।

आवाहनम्—ॐ भूर्भुवः स्वः सपरिवार बले! इहागच्छेह तिष्ठ सुप्रतिष्ठितो भव वरदो भव ॥

ध्यानम्—सर्वाभरणसम्पूर्णं विन्ध्यावल्यासहासितम् । कूष्माण्डबाणजम्भोरू मयदानवसंवृतम् ॥
सम्पूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् । द्विभुजं दैत्यराजानं ध्यायेद्वैरोचनं बलिम् ॥

पाद्याद्युपचारैः पूजयेत्—ॐ बलये नमः । विन्ध्याचल्यै नमः । कूष्माण्डाय नमः । बाणाय नमः । उरवे नमः । मयाय नमः । प्रत्येकं सम्पूज्य आवाहनादि नीराजनान्तं [2]विधाय प्रार्थयेत् ॥

---

१ ततो बलिर्गृहद्वारि स्थाप्यो गोमयमूर्तिमान् । मुने श्रीबालगोपालःस्थाप्यो गोवर्धनो महान् ॥—पद्मः ।
कृतैतत्सर्वमेवेह रात्रौदैत्यपतेर्बलेः । पूजां कुर्याच्चरः साक्षाद्भूमौ मण्डलकेशवे । बलिनामास्यदैत्येन्द्रं वर्णकैः पञ्चकैरिति ।—निर्णयामृते स्कान्दे ।

२ गन्धपुष्पान्ननैवेद्यैरक्षतैर्गुणपूपकैः । मधुमांससुरालेह्यदीपावल्युपहारकैः ॥ मन्त्रेणानेन राजेन्द्रः समन्त्री सपुरोहितः ।
पूज्य इत्यग्रिमेणान्यो भविता ।—अर्चनविधिस्तु मदनरत्ने ।

बलिराज नमस्तुभ्यं वैरोचनसुत प्रभो ! भविष्येन्द्र सुरारते विष्णुसान्निध्यसूचक ॥

सुराभावे गोदुग्ध-सैन्धवमिश्रितं कृत्वा समर्पयेत् ॥ एवं विधिना सम्पूज्य विसर्जयेत् ॥ इति बलिपूजनम् ॥

कार्तिकशुक्लनवम्यां कूष्माण्डदानम्—ॐ विष्णुः ३ अद्येहामुकोऽहं कार्तिकशुक्लनवम्यां श्रीपरमेश्वर-प्रीत्यर्थं सशैलभूदानजन्यफलावाप्तये घृताक्तं वज्र-वैदूर्य-मणि-मुक्ता-प्रवाल-हाटकादिभिर्युक्तमिमं कूष्माण्डं विष्णुदैवत्यं ब्राह्मणाय दास्ये तत्सन्न मम ।

दानवाक्यम्-कूष्माण्डं बहुबीजाढ्यं ब्रह्मणा निर्मितं पुरा । तस्मादस्य प्रदानेन सन्ततिर्वर्धतां मम ॥

[1]हरिबोधिनीविधानम्—एकादश्यां प्रातः स्नात्वा सन्ध्यावन्दनादि नित्यकर्म समाप्य विष्णुप्रार्थना—

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

ॐ विष्णुः ३ अद्येहामुकोऽहं सकलपापक्षयपूर्वक श्रीमत्परमेश्वरप्रीतये अस्यामेकादश्यां नियम-विधानेन निरवच्छिन्नोपवासमहं करिष्ये ।

---

१ इक्षुदण्डैर्गृहं कृत्वा देशकालोद्भवैः फलैः । सम्पूर्णैर्दीपवलभिः कारयेद्धरिमन्दिरम् ॥
रात्रौ जागरणं कुर्यात् सूर्पडिण्डिमनिःस्वनैः । एवं यः कुरुते मर्त्यो विष्णुलोकं स गच्छति ॥

नियमः—एकादश्यां निराहारः सर्वभोगविवर्जितः। मोक्षेऽहं पुण्डरीकाक्ष शरणं मे भवाच्युत॥

अन्यच्च—एकादश्यां निराहारो वर्जयिष्यामि वै जलम्। केशवप्रीणनार्थाय अन्यदाचमनादृते॥ -ब्रह्मवैवर्तः

मध्याह्ने पूर्ववत् स्नानं विधाय कृतनित्यक्रियो मण्डपं यथासंख्यालंकृत्य पूजामारभेत्॥

सङ्कल्पः—ॐ विष्णुः ३ अद्येहामुकोऽहं सकलपापक्षयपूर्वकयथोक्तफलावाप्तये अद्य एकादश्यां श्री विष्णोः पूजनमहं करिष्ये।

ध्यानम्—शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं०, पुरुषसूक्तेनावाहनादिषोडशोपचारैः सम्पूजयेत्।

अङ्गपूजा—ॐ मत्स्यदेवाय नमः पादौ पूजयामि। कूर्मदेवाय नमः जङ्घे०। वराहदेवाय नमः जानुनी० नृसिंहदेवाय नमः कटिं०। वामनाय नमः उदरं०। परशुरामदेवाय नमः बाहू०। रामचन्द्रदेवाय नमः कण्ठं०। कृष्णदेवाय नमः मुखं०। बौद्धदेवाय नमः नेत्रे०। कल्किदेवाय नमः ललाटं०। केशवदेवाय नमः शिरः०। सर्वात्मने नमः सर्वांगं पूजयामि। ततोऽष्टाक्षरमंत्रं जप्त्वा।

अर्घ्यम्—जन्मान्तरसहस्रेषु यन्मया पातकं कृतम्। तत्सर्वं नाशमायातु प्रसादात् तव केशव॥

गीतनृत्यकथाश्रवणादिभिरहर्निशं च नीत्वा प्रभाते स्नानसन्ध्यादिकं विधाय विष्णोः प्रबोधनं द्वादश्याम्।

ब्रह्मेन्द्ररुद्राग्निकुबेरमित्रसोमादिभिर्वन्दितपादपद्म। बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव ॥
इयं च द्वादशी देव! प्रबोधार्थं विनिर्मिता। त्वयैव सर्वलोकानां हितार्थं शेषशायिना ॥
उत्तिष्ठोत्तिष्ठ गोविन्द! त्यज निद्रां जगत्पते! त्वयि सुप्ते जगत् सुप्तमुत्थिते चोत्थितं भवेत् ॥
गता मेघा वियच्चैव निर्मलं निर्मला दिशः। शारदानि च पुष्पाणि गृहाण मम केशव ॥

ततः पुष्पाञ्जलिः। दन्तधावनार्थं इक्षुदण्डानि विष्णवे समर्पयेत् ॥ इति हरिबोधिनीविधानम् ॥

भीष्मपञ्चकव्रतम्, प्रातः स्नानसन्ध्यादिकर्म कृत्वा वारिपूर्णताम्रपात्रमादाय उदङ्मुखः पवित्रपाणिराचम्य विष्णुं प्रार्थ्य—ॐ अद्येहामुकोऽहं सकलपापक्षयपूर्वकं श्रुतिस्मृतिपुराणोक्तफलावाप्तये श्रीपरमेश्वर-प्रीतये यथोक्तविधिना भीष्मपञ्चकव्रतं करिष्ये। मध्याह्ने नद्यां गोमयेन स्नात्वा यवदर्भतिलैः पितॄन् सन्तर्प्य ॥ पुनः स्नात्वा पूजासमाप्ति पर्यन्तं मौनी भवेत् ॥ धौते वाससी परिधाय तिलकं कृत्वा गन्ध-पुष्पादियुतमर्घ्यमुक्तमन्त्रेणोक्तरीत्या पञ्चकृत्वो यज्ञोपवीती सन् पितृतीर्थेन सतिलमुदकं भीष्माय तर्पयेत्।

भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः। आभिरद्भिः समाप्नोतु पुनर्पौत्रोचितां क्रियाम् ॥
वैयाघ्रपादगोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्येतत् सतिलं भीष्मवर्मणे ॥

वसूनामवताराय शन्तनोरात्मजाय च । अर्घ्यं ददामि भीष्माय आजन्म ब्रह्मचारिणे ॥

भीष्मं लक्ष्मीसहितं वासुदेवं यथामिलितोपचारैर्जले सम्पूज्य पञ्चरत्नानि ब्राह्मणाय दत्वा गृहं गत्वा समाहितो भूत्वा, आवाहनादि षोडशोपचारैर्विष्णुं सम्पूज्य पञ्चसु दिनेष्वनवच्छिन्नो भवेत् ॥ पायसं निवेद्य पूजाशेषं समापयेत् ॥ 'ॐ हरये नमः' कमलैर्विष्णोः पादौ पूजयेत् ॥ सहस्रनामस्तोत्रपाठादिना स्तुत्वा प्रणम्याष्टाक्षरमन्त्रमष्टोत्तरशतं जपं कृत्वा स्वगृह्योक्तविधिनाग्निं स्थाप्य घृताक्ततिलव्रीहियवान् ॐ विष्णवे नमः स्वाहेत्यष्टोत्तरशतं हुत्वा स्वर्णं दद्यात् ॥ गन्धद्वारामिति गोमयमादाय त्रिः प्राश्योपवसेत् ॥ मुन्यन्नादि हविष्यान्नं भक्षयेत् ॥ सायं सन्ध्यामुपास्य नारायणं प्रणम्याष्टाक्षरं पुनर्जपित्वा भूमिशायी भवेत् ॥ एवं पञ्चस्वपि दिनेषु कुर्यात् ॥ तत्र विशेषः, द्वितीयेऽहनि बिल्वपत्रैः कटिदेशं पूजयेत् । गोमूत्रं गायत्र्या प्राश्नीयात् । तृतीयेऽहि शृङ्गारकेण नाभिं पूजयेत् ॥ आप्यायस्वेति क्षीरं प्राश्नीयात् ॥ चतुर्थेऽहि बाण-बिल्व-जयाभिः स्कन्धावर्चयेत् । दधिक्राव्ण० इति दधि प्राश्नीयात् ॥ पञ्चमेऽहि मालत्या शीर्षं पूजयेत् । घृतवतीति घृतं प्राश्नीयात् ॥

पापपुरुषदानम्—सुवर्णप्रतिमां विधाय ॐ यमायत्वेति प्रतिमां पाद्यादिभिः पूजयित्वा पुष्पपूर्णमञ्जलिः—

यदन्यजन्मनि कृतमिह जन्मनि वा कृतम्। पापं विनाशमायातु तव पादप्रसादतः॥ धर्मो मे प्रीयतामिति समर्प्य वाचकायाऽन्यस्मै वा प्रतिमां दत्वा ब्राह्मणान् पूजयित्वा यथाशक्त्या गो-हिरण्यादिकं तेभ्यो दद्यात्। उक्त दानाभावे वस्त्रं गोघृतं पायसं दद्यात्॥ उक्तरीत्या प्रणवेन पञ्चगव्यं प्राश्य ताम्बूलवर्जन-सत्यभाषण-सत्कथालापैर्दिनानि निगमेत्॥ इति भीष्मपञ्चकव्रतम्॥

कार्तिकस्नानव्रतोद्यापन-तुलसीविवाहप्रयोगः—पूर्वदिने रात्रौ मासत्रयवर्द्धितायास्तुलस्या उपरि मण्डलं विधाय सर्वभद्रं विलिख्य कदलीस्तम्भं संस्थाप्य नानाविधतिल-हरित-रक्त कर्पूर-श्वेत-धवल-मेचक-तोरणादिभिरलंकृत्य पुनस्तत्कालोद्भवैः पुष्पैः शतपत्र-कुमुदिनी-मालती-जाती-प्रवाल-मल्लिका-कोविदार-पाटली-कुन्द-बकुल-चम्पक-पारिजात-दूर्वा-दमनादिभिः समलंकृत्य पुनः कालोद्भवैः जम्बीरामलक-मातुलिंगेक्षु-बदर-नारिकेल-कदल्यादिभिः फलैः सम्भूष्य कर्पूरागुरुकङ्कोल-कुंकुमादिसुगन्धद्रव्यैः सौगन्ध्य गुग्गुल-कृष्णागुरु-कालिङ्गादि धूपादिभिः सन्धूप्य पञ्चरत्नयुतकलशं संस्थाप्य तत्र सुवर्णप्रतिमायां दामोदरं पूजयेत्॥ मण्डपस्य चतुर्द्वारेषु पुण्यशील-सुशील-जय-विजयसंज्ञकान् द्वारपालान् पञ्चोपचारैः पूजयेत्॥ सर्वतोभद्रे सूक्तपद्धत्या देवतादीन् पूजयेत्॥ अर्घं संस्थाप्य, प्राणानायम्य संकल्पः—ॐ विष्णुः ३ अद्येहाऽमुकोहं सकल-

पापक्षयपूर्वकरम्भा-उर्वशी-तिलोत्तमा-सुकेशी-मञ्जुघोषाद्यप्सरोभिः स्वर्णदण्डयुक्तव्यजनैः शीतलायमानानेकब्रह्मतुल्यब्राह्मणैः सेव्यमानविमानाधिरोहणपूर्वक-शतवर्षावच्छिन्ननन्दनवनोद्यान-विहरण तदनन्तरं विष्णुसायुज्यपदप्राप्तिकामः राधादामोदरपूजनमहं करिष्ये । प्रतिष्ठादिपूर्ववत् ।

ध्यानम्—दक्षिणाधस्तनकरादारभ्यैतत् प्रदक्षिणम् । शङ्खचक्रगदाशार्ङ्गपद्मैर्दामोदरो भवेत् ॥

तत्रादौ द्वारपालान् सम्पूजयेत्—ॐ पुण्यशीलाय नमः । सुशीलाय० । जयाय० । विजयाय नमः ।

दिक्पालान् पूर्वादिक्रमेण—ॐ इन्द्राय नमः । अग्नये० । यमाय० । निर्ऋतये० । वरुणाय० । वायवे० । कुबेराय० । ईशानाय नमः ।

ततो दामोदरं पुरुषसूक्तेन आवाहनादिषोडशोपचारैः पूजयेत् । अर्घदानम्—

नमः सहस्रशीर्षाय सहस्राक्षाय ते नमः । नमः सहस्रपादाय पुरुषाय नमो नमः ॥
सहस्रनाम्ने देवेश ! प्रसीद त्वं ममाच्युत ! अर्घ्यं गृहाण देवेश ! सर्वकामप्रदो भव ॥

अष्टदिक्षु अष्टौ दीपान् प्रज्वाल्य रात्रौ सत्कथालापगीतवाद्यादिमङ्गलैर्जागरणं कृत्वाधिवासयेत् । ततः प्रातः कृतनित्यक्रियः त्रिंशत्संख्याकान् ब्राह्मणान्निमन्त्र्य स्वगृह्योक्तविधिनाग्निं संस्थाप्य होमसंकल्पः—

ॐ अद्येहामुकोऽहं कार्तिकस्नानव्रतोद्यापन-तुलसीविवाहहोमकर्मणि आघाराज्य-देवताभ्यः इदमाज्यं विष्णवे तिलपायसद्रव्यं मया परित्यक्तं यथादैवतं अस्तु न मम ॥ चतुः स्वस्त्यादिपर्यन्तं होमं कृत्वा । ॐ राधादामोदराभ्यां स्वाहेति हुत्वा, इदं राधादामोदराभ्यां न मम इति त्यागं कुर्यात् ॥

विशेषः—ॐ अतो देवाऽअवन्तुनो यतोविष्णुर्विचक्रमे पृथिव्यास प्रधाना स्वाहा ॥ ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ मन्त्राभ्यां लक्षं सहस्रमष्टोत्तरशतं वा हुत्वा पूर्णपात्रदानं विधाय उत्तराङ्गपूजां च विधाय, ॐ अद्येहामुकोऽहं कार्तिकव्रतस्योद्यापनकर्मणि श्री विष्णोः प्रीतये आश्विनशुक्लैकादशीमारभ्य कार्तिकपौर्णमासीपर्यन्तं कृतस्य व्रतनियमस्य साङ्गतासिद्ध्यर्थं इमां सुपूजितां सौवर्णीं राधादामोदरप्रतिमां सपरिच्छदाममुकगोत्रायाऽऽचार्याय तुभ्यमहं सम्प्रददे ॥

दानप्रतिष्ठा—अद्य कृतैतत् दानप्रतिष्ठासिद्ध्यर्थमिदं सुवर्णं तत्प्रत्याम्नायद्रव्यं वा ब्राह्मणाय दास्ये ॥

शक्तिश्चेत् समलंकृतां गां दद्यात् । त्रिंशत्संख्याकान् ब्राह्मणान् सम्पूज्य प्रार्थयेत्—

युष्मत् प्रसादाद्देवेश ! प्रसन्नो भव सर्वदा । व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥

तत्सर्वं नाशमायातु स्थिरा मे चास्तु सन्ततिः। मनोरथाश्च सफलाः सन्तु नित्यं तवार्चनात्॥
देहान्ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभम् ॥

संकल्पः—ॐ अद्येह न्यूनातिरिक्तपरिपूर्णार्थमिमां भूयसीदक्षिणां नानानामगोत्रेभ्यो विभज्य दास्ये॥

ततः कलशोदकेनाभिषेकमन्त्रपाठः, तिलक-रक्षाबन्धन-त्र्यायुषकरणं घृतच्छायानिरीक्षणकार्यं कुर्युः। ब्राह्मणान् भोजयित्वा दक्षिणादिना ब्राह्मणान् सन्तोष्य अछिद्रवाक्यानि पठित्वा पारणं कृत्वा बन्धुभिः सह भुञ्जीत। ततो[१] धात्रीच्छायायां भोजनम्। अतो धात्रीपूजा कार्तिक्यमावास्यामेव कार्या ब्राह्मणभोजनं च।

इति कार्तिकव्रतोद्यापनविधिः समाप्तम्।

★

---

१ धात्रीच्छायां तु यः कुर्यात् पित्र्यर्थं पितृभोजनम्। मुक्तिं प्रयान्ति पितरः प्रसादान् माधवस्य तु॥
धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः। धात्रीफलकृताहारो नरो नारायणो भवेत्॥
धात्रीच्छायां समाश्रित्य योऽर्चयेच्चक्रधारिणम्। पुष्पे पुष्पेऽश्वमेधस्य फलमाप्नोति मानवः॥

वसन्तपञ्चमी पूजाविधिः

कृतनित्यक्रियः उपलिप्ते प्राङ्मुखो दीपं प्रज्वाल्याचम्य मण्डपस्येशानभागे कलशमेकं स्थापयेत्॥ (पृ० ९)

संकल्पः—ॐ अद्येत्यादि देशकालौ स्मृत्वा करिष्यमाणरति-कामदेवपूजनकर्म निर्विघ्नपरिसमाप्त्यर्थं नवग्रह-गणपति-दुर्गा-वाय्वाकाशाश्विनिकुमारपूजनमहं करिष्ये। ॐ गणानान्त्वेति गणपतिम्॥१॥ अम्बेऽअम्बिके इति दुर्गाम्॥२॥ वायोयेते इति वायुम्॥३॥ ऊर्द्धाऽअस्येति आकाशम्॥४॥ अश्विनोर्भैषज्यमीति अश्विनीकुमारं पूजयेत्॥५॥

ततो नवग्रहानपि स्वस्वनामभिः पूजयेत्। ॐ आकृष्णेनेति सूर्यम्। इमन्देवेति सोमम्। अग्निर्मूर्द्धेति भौमम्। उदुबुध्यस्वेति बुधम्। बृहस्पतेऽअतीति बृहस्पतिम्। अन्नात्परिश्रुतमिति शुक्रम्। शन्नोदेवीरिति शनैश्चरम्। कयानश्चित्रेति राहुम्। केतुं कृण्वन्निति केतुम्॥ एतान् पूजयित्वा सानुनयं विसृज्य तस्य कलशस्य वामभागे स्वपूर्वाभिमुखे उत्तरपीठिकायां श्वेतवस्त्रेऽष्टदलपद्मं विलिख्यानुक्रमेण इन्द्रादिदिक्पालान् स्वस्वमन्त्रेण पूजयेत्॥ पूर्वाष्टदलकोणदारभ्य पूर्वे ॐ त्रातारमिन्द्रेति इन्द्रम्। आग्नेये अग्निन्दूतमित्य-

ग्निम्। दक्षिणे यमायत्वेति यमम्। नैर्ऋत्ये असुन्वन्तमयजमानमिति निर्ऋतिम्। पश्चिमे तत्त्वा-यामिति वरुणम्। वायव्ये वातोयेति वायुम्। उत्तरे सोमोधेनुमिति सोमम्। ईशाने वयꣳसोमव्रतेति ईशानम्।

ततोऽष्टदलमध्ये रतिकामदेवौ षोडशोपचारैः पूजयेत्॥ ततो अक्षतान् गृहीत्वा आवाहनम्—ॐ क्लीं ह्रीं काम इहागच्छ इह तिष्ठ॥ ॐ ह्रीं रते इहागच्छेह तिष्ठ॥ ॐ ह्रीं रतिकामाभ्यां नमः॥ पाद्यमर्घ्य-माचमनीयं, चन्दनमक्षतान्, पुष्पं, धूपं, दीपं नैवेद्यं, दक्षिणां, ताम्बूलं, अबीरकं, सुगन्धिनानाप्रकारं, वस्त्रं च समर्प्य सानुनयं विसृज्य तत्रैव ब्राह्मणं पूजयेत्। तच्च विसृज्य वस्तुसम्भारं ब्राह्मणाय निवेदयेत्॥ एवं पूजां विधाय ब्राह्मणमुखेन वसन्तरागं श्रुत्वा तं ब्राह्मणं वस्त्रादिभिः सन्तोष्य कलशस्थजलेनाम्रपल्लवेना-भिषिञ्चेत्॥ ततो दक्षिणा—ॐ अद्येत्यादि रतिकामपूजनकर्मप्रतिष्ठासाङ्गतासिध्यर्थं दक्षिणां यद्द्रव्यं तद्दैवतं यथानामगोत्रायेत्यादि॥

इति वसन्तपञ्चमी पूजाविधिः समाप्ता।

★

पुरुषोत्तम-दान पूजाविधिः

कर्मपात्रं कृत्वा दीप-कलश-गणेशं सम्पूज्य सुवर्णप्रतिमायां विष्णुनामपूजनम्—ॐ विष्णवे नमः। जिष्णवे०। महाविष्णवे०। हरये०। कृष्णाय०। सद्योजाताय०। केशवाय०। माधवाय०। रामाय०। अच्युताय०। पुरुषोत्तमाय०। गोविन्दाय०। वामनाय०। श्रीसंकर्षणाय०। श्रीकण्ठाय०। विश्वसाक्षिणे०। नारायणाय०। मधुरिपवे०। अनिरुद्धाय०। त्रिविक्रमाय०। वासुदेवाय०। जगद्योनये०। अनन्ताय०। शेषशायिने०। सङ्कर्षणाय०। प्रद्युम्नाय०। दैत्यारये०। विश्वतोमुखाय०। जनार्दनाय०। धरावासाय०। दामोदराय०। मुरमर्दनाय०। श्रीपतये नमः। सम्पूज्य अपूपान् दद्यात्—मम यथोक्तफलावाप्तिविष्ण्वादि श्रीपत्यन्तत्रयस्त्रिंशद्देवताप्रीतिपूर्वकं श्रीपुरुषोत्तमभास्करप्रसन्नकामनया धर्मार्थकाममोक्षचतुर्विधसिद्ध्यर्थं पृथ्वीदानफलप्राप्त्यर्थं इदमाधारपात्रं सोमदैवतं त्रयस्त्रिंशदपूपाः प्रजापतिदैवता घृतं समुद्रदैवतं सुवर्णं वह्निदैवतं वस्त्रं बृहस्पतिदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय पुरुषोत्तमस्वरूपाय तुभ्यमहं सम्प्रददे॥

प्रार्थना—विष्णुरूपसहस्रांशुः सर्वपाप प्रणाशनः। अपूपान्नप्रदानेन मम पापं व्यपोहतु॥
नारायणजगद्बीज भास्करः प्रतिरूपकः। दानेनानेन पुत्रांश्च सम्पदश्चाभिवर्धय॥
यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनम्। शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु॥
कलाकाष्ठादि रूपेण निमेषघटिकादिना। यः संहरति भूतानि तस्मै कालात्मने नमः॥
कुरुक्षेत्रमयं देशः सूर्यपर्वद्विजो हरिः। पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम॥
मलानां च विशुद्ध्यर्थं पापप्रशमनाय च। पुत्र-पौत्राभिवृद्ध्यर्थं प्रदत्तं तव भास्कर!॥
पुरुषाय नमः इति प्रार्थना॥ ॐ अद्य श्रीपुरुषोत्तमप्रीत्यर्थं कृतस्य त्रयस्त्रिंशदपूपपूरितकांस्य-पात्र-घृत-सुवर्ण--ताम्बूल-वस्त्रदानकर्मणः साङ्गतासिद्ध्यर्थं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय सम्प्रददे इति भूयसीं दत्वा समापयेत्॥ पुरुषोत्तमदानपूजाविधिः समाप्तः॥

एकादशी पूजाविधिः

अखण्डैकादशी व्रतपूजाविधिः प्रयोगः—कर्ताऽऽचम्य प्राणायामं कृत्वा मङ्गलोच्चारणं हृदि स्पर्शनं कुर्यात् ॥ दीपं प्रज्वाल्य कर्मपात्रं (पृ. १०) कुर्यात् ॥ ॐ अपवित्रः पवित्रो वा० इति संसिच्य अर्घस्थापनम् ॥ त्रिकोणवृत्तभूविधात्मकमण्डले चन्दनादिना विलिख्य ॥ क्रमेण त्रिकोणे—ॐ कूर्माय नमः । ॐ पृथिव्यै० ॐअनन्ताय नमः । मध्ये आधारशक्तये नमः सम्पूज्य संस्थाप्य च ॥ आधारोपरि शङ्खार्घपात्रं फडिति प्रक्षाल्य नमः इति सम्पूज्य, संस्थाप्य चार्घौ—

ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ! तेन सत्येन देवेश ! तीर्थं देहि दिवाकर ! ॥

सूर्यमण्डलात् तीर्थमानीय-गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु ॥

तीर्थमावाह्य दुग्ध-यव-तिल-कुश-दूर्वा-सर्षप-फल-तुलसीदलादीन् पात्रे निक्षिप्य गन्ध-पुष्पाक्षतादिभिः

---

१ कांस्यं मांसं च मसुरांश्चणकं कोद्रवं तथा । शाकं मधुं परान्नं च मैथुनं परदूषणम् ॥
एकादशी विद्धतो दशम्यां दशयर्जयेत् । प्रातःस्नाने पितुः श्राद्धे दशमी द्वादशी दिने ॥ तैलाभ्यङ्गेषु यत्तैलं तत्तैलं सुरया समम् ॥

समभ्यर्च्य धेनुमुद्रां प्रदर्श्य मत्स्यमुद्रां कृत्वा प्रणवमष्टधा जपित्वा ॥ अर्घोदकेनास्थानभूमौ सम्प्रोक्ष्य ॥
ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥
ॐ आधारशक्तिकमलासनाय नमः-सम्पूज्य ।

ततः स्वस्तिकाद्यासनम् । ततो भूतशुद्धिं कुर्यात् । वामहस्तेन घण्टां वादयेत् । दक्षिणहस्तेन सर्षपानादाय—
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
भूमिताडनम् । भूतोत्सादनं कुर्यात् । वामहस्तेन घण्टां वादयेत् । दक्षिणहस्तेन सर्षपान् विकिरेत्—
अपक्रामन्तु भूतानि पिशाचाः प्रेतगुह्यकाः । ये चात्र निवसन्त्यन्ये देवता भुवि संस्थिताः ॥

सङ्कल्पः—ॐ अद्येहेत्यादि देशकालादि संकीर्त्य अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः सदारापत्यस्य ममेह समस्तजन्मोपार्जितपापक्षयपूर्वकमनसेप्सितावाप्तये अखण्डैकादशी व्रताङ्गत्वेन दीप-कलश-गणेशपूजनपूर्वकसुदर्शनाङ्गदेवतासहित श्रीलक्ष्मीनारायणपूजनमहं करिष्ये ॥ ॐ नमोऽस्त्वनन्ताय इति दीपं, गणानान्त्वेति गणपतिं पूजयेत् । ततः सुमुखश्चेति, वक्रतुण्डेति च प्रार्थयेत् ॥

१ आसनस्य चतुष्कोणे गणेशं च सरस्वतीम् । दुर्गां क्षेत्रपतिं मध्ये ब्रह्मादींश्च समर्चयेत् ॥

कलशस्थापनम् (पृ. १०) ततः कलशस्य स्कन्धप्रदेशे ॐ गणपत्यादिवनस्पत्यन्तदेवेभ्यो नमः इति च पूजयेत्। तदुपरि कलशं कलशोपरि रौप्यपात्रं ताम्रपात्रं वा संस्थाप्य, अष्टदलं लिखित्वा पूर्वाभिमुखो-भूत्वाऽऽचम्य प्रतिमां गृहीत्वा हिमस्यत्वेति मन्त्रेण पञ्चगव्येन प्रक्षाल्य। आपोऽअस्मान्निति मन्त्रेण प्रतिमां स्थापयित्वा कलशोपरि स्थाल्यां स्थापयेत्॥ मनोजूतिरिति मन्त्रेण प्राणप्रतिष्ठां कुर्यात्। ॐ यं रं लं वं शं षं हं सः लक्ष्मीनारायणस्य प्राणाः सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्रघ्राणानि इहा-गत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठां कृत्वा॥

एतद्गृहीतं गोविन्द! मया त्वत्पुरतो व्रतम्। सिद्धिं गच्छतु निर्विघ्नां तव पादानुकम्पया॥
यथा चञ्चलचित्तोऽहं लोभमोहमयो नरः। शक्तोऽहं तद् व्रतं कर्तुं तव चानुग्रहोऽस्तु मे॥
एकादश्यां निराहारः स्थित्वा चैव परेऽहनि। भोक्ष्यामि पुण्डरीकाक्ष! शरणं मे भवाव्यय॥

ततः ॐ ह्रीं क्लीं लक्ष्मीसहितविष्णुरिहागच्छेत्यावाह्य पाद्यादिना सम्पूज्य शिरसि मूलमन्त्रेण [1]पुष्पाञ्जलिं दद्यात्। ततोऽष्टदलमध्ये पूर्वादिक्रमेण पीठपूजां कुर्यात्—ॐ विमलायै नमः। ॐ उत्कर्षिण्यै०। ॐ

---

१ इमौ मन्त्रौ पठित्वा तु तमेव कुसुमाञ्जलिम्। दत्वा नारायणायाथ दण्डवत् प्रणमेद् भुवि॥

क्रियायै नमः ॥ ततः पूर्वदले ॐ सुदर्शनाय नमः। इति मन्त्रेण पाद्यादिनमस्कारान्ते सुदर्शनं पूजयेत् ॥ आग्नेयदले-ॐ पाञ्चजन्याय नमः। दक्षिणे-ॐ कौमोदक्यै नमः। नैर्ऋत्ये-ॐ पद्मायै नमः पश्चिमे-ॐ जयाय नमः। वायव्ये-ॐ विजयाय नमः। उत्तरे-ॐ नन्दाय नमः। ईशाने-ॐ सुनन्दाय नमः। ॐ यज्ञाय०। ॐ योगाय०। ॐ वृद्धये०। ॐ सत्यायै०। ॐ ईशान्यै नमः। ततो मध्ये—ॐ अनुग्रहायै नमः ॥ ॐ नमो भगवते विष्णुदेवाय सर्वात्मने योगपद्मपीठात्मने नमः ॥ पुनः अष्टदले पूर्वादिक्रमेण—ॐ नन्दाय नमः। ॐ सुनन्दाय०। ॐ अबलाय०। ॐ प्रबलाय०। ॐ जयाय०। ॐ विजयाय०। ॐ पुण्यशीलाय०। ॐ सुशीलाय नमः।

अङ्गपूजा—ॐ कृष्णाय नमः पादौ पूजयामि। ॐ नारायणाय नमः गुल्फौ०। ॐ केशवाय नमः जानुनी०। गोविन्दाय नमः गुह्यं०। ब्रह्मणे नमः नाभिं०। दामोदराय नमः उदरं०। परमात्मने नमः हृदयं०। परिपूर्णाय सर्वान्तर्यामिने नमः मुखं०। अन्तकाय नमः बाहू। सर्वजनपरिपालकाय नमः ललाटं०। मुकुन्दाय नमः शिरः०। हरये नमः सर्वाङ्गं पूजयामि ॥ वासुदेवाय नमः। गोविन्दाय०। मुकुन्दाय०। वामनाय०। रामाय०। त्रिविक्रमाय०। नृसिंहाय०।

नारायणाय नमः ॥ पुनः पूर्वादिक्रमेण—ॐ शङ्खाय नमः । ॐ चक्राय० । ॐ खड्गाय० । ॐ गदायै० । ॐ बाणाय० । ॐ शार्ङ्गधनुषे० । ॐ पाशाय० । पूर्वे लक्ष्म्यै नमः । दक्षिणे विष्वक्सेनाय० । पश्चिमे गरुडाय० । उत्तरे पद्माय नमः । इन्द्रादिदशदिक्पालेभ्यो, वज्रादिदशायुधेभ्यो नमः ॥ मध्यैकदेशे प्रतिमासमीपे-अमुकनाम्न्यैकादश्यै नमः इति दद्यादिति नमस्कारान्तैरेकादशीं पूजयेत् ॥ ततः सप्रणवगायत्रीं श्रावयित्वा 'लक्ष्मीसहित नारायणाय नमः' इत्युच्चार्य ध्यायेत्—

आसीनं हेमपीठे जलनिचिततयालंकृतं क्रोडदेशे विद्युल्लेखोज्ज्वलाभ्रद्युतिरुचिरतनुं दीर्घदोर्भिश्चतुर्भिः ॥
नित्यं विभ्राजमानं सकलमुनिगणैः सायुधं पद्मनेत्रं पश्यन्तं श्रीसरसिजमनिशं तं भजेऽपाङ्गदृष्ट्या ॥

लक्ष्मीनारायणं पुरुषसूक्तेन च षोडशोपचारैर्वा पूजयेत्—

आवाहनम्-आगच्छ भगवन् देव सहितः श्रीपते श्रिया। पूजां गृहाण देवेश मम भक्त्या प्रयच्छत ॥
आसनम्-सर्वलक्षणसम्पन्नं लक्ष्म्या सह जगद्गुरो ! अस्मिन् वरासने तिष्ठ यावत्पूजां करोमि ते ॥
समस्तलोकविख्यातं कीर्त्या नारायण प्रभो ! ब्रूहि मे कुशलं सर्वं सर्वज्ञोऽसि सुरार्चित ॥
पाद्यम्-पाद्यं गृहाण देवेश ! नारायण सुवासितम् । पापौघचारुसंहारि पवित्रमतिशीतलम् ॥

अर्घ्यम्-अर्घ्यं ददामि ते विष्णो ! दूर्वापल्लवसंयुतम् । अखण्डतण्डुलोपेतं पुण्डरीक नमोऽस्तु ते ॥
आचमनीयम्-इदमाचमनीयं तु सुपवित्रं ददामि ते । गृहाण परमानन्द परमानन्दवर्द्धनम् ॥
मधुपर्कम्-मधुपर्कमिमं देव दध्याज्यमधुसाधितम् । कांस्यपात्रस्थितं विष्णो ! कल्पयामि प्रसीद मे ॥
पुनराचमनीयम् उच्छिष्टोऽपि शुचिर्वापि यस्य स्मरणमात्रतः । शुचिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥
पञ्चा० पयसा-देवाद्यैर्निर्मिता धेनुः सर्वपापप्रणाशिनी । तत्क्षीरस्नापितो देव नित्यं मे वरदो भव ॥-शुद्धो०
दध्ना-कामतोऽकामतो वापि यन्मया दुष्कृतं कृतम् । तत्सर्वं विलयं यातु दधिस्नानेन कामद ॥-शुद्धो०
घृतेन-रसानामुत्तमं त्वाज्यं देवानां च सदा प्रियम् । तेन त्वं स्नापितो देव निधिकान्तिप्रदो भव ॥-शुद्धो०
मधुना-यस्य स्मरणमात्रेण तृप्तिं यान्ति पितामहाः । मधुना स्नापितो देव ! नित्यं शोकहरो भव ॥-शुद्धो०
शर्करया-यमलोकभयात् त्रस्तः शरणं त्वां गतः प्रभो ! खण्डस्नानेन देवेश मां कुरुष्व सुखान्वितम् ॥-शुद्धो०
जलेन-गङ्गा च यमुना चैव नर्मदा च सरस्वती । तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतम् ॥
वस्त्रम्-सोत्तरीयमिदं वस्त्रं वस्त्रश्रेणीसुशोभनम् । लक्ष्मी-नारायणो देवः प्रीयतां पीतवाससः ॥
उपवीतम्-सौवर्णतन्तु ग्रथितं ब्रह्मसूत्रं सुशोभनम् । त्रयीमयं गृहाणेदं त्रिगुणात्मकमीश्वर ॥

चन्दनम्—मया दत्तन गन्धेन जरामरणनाशनम्। तवास्तु भूषितं गात्रं लक्ष्मीनाथ! सुगन्धिना॥
अक्षताः—अक्षतान् धवलान देव! गृहाण वरदर्षभ! सर्वदेवोत्तमस्त्वं हि चाक्षयं कुरु मे फलम्॥
पुष्पाणि—गृहाण कुसुमं देव! सामोदं विकचं हरे! कालदेशोद्भवं दिव्यं पुष्पाणि प्रतिगृह्यताम्॥
अङ्गपूजा—ॐ दामोदराय नमः पादौ पूजयामि। माधवाय नमः जानुनी०। कामपतये नमः गुह्यं०। वामनाय नमः कटिं०। नारायण नमः उदरं०। ज्ञानगम्याय नमः हृदयं०। श्रीकण्ठाय नमः कण्ठं०। सहस्रबाहवे नमः बाहू०। सहस्राक्षाय नमः मुखं०। योगयोगिने नमः चक्षुषी०। मुरलीधराय नमः ललाटं०। सुरेश्वराय नमः नाभिं०। सवशाय नमः श्रोत्रे०। सर्वकामदाय नमः शिरः०। सहस्रशिरसे नमः ललाटं०। सर्वरूपिणे नमः सर्वांगं पूजयामि।
धूपम्—सृष्टोऽयं विधिना पूर्वं देवानां तुष्टिवृद्धये। अतस्तुभ्यं सुरश्रेष्ठ! धूपोऽयं दीयते मया॥
दीपम्—तमसस्तोमसंहर्ता घृतपूर्णो जनार्दन! तवास्तु प्रीतये दीप एष शेष भुजङ्गम!॥
नैवेद्यम्—नैवेद्यं ते मया दत्तं देवेश प्रतिगृह्यताम्। अन्नं चतुर्विधं स्वादु भूतानां जीवनं परम्॥
करोद्वर्तनम्—कर्पूरवासितं तोयं गङ्गायास्तु समाहृतम्। आचम्यतां जगन्नाथ! प्रणतार्तिहर प्रभो॥

ताम्बूलम्—मुखदुर्गन्धिहरणं कर्पूरेण समन्वितम्। गृहाण विष्णो ताम्बूलं कैवल्यद सहश्रिया॥
फलम्—इदं फलं मया देव! स्थापितं भवदग्रतः। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥
करोद्वर्तनम्—इदं विष्णुरिति, विष्णोरराटमसीति द्वाभ्याम्। नारिकेल लवंग जातिफलादीनि समर्प्य॥
दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥
आदर्शनम्—दूतश्चैवोपचारेषु जलाद्याधानिकेषु च। गृह्णगात्रावलोकार्थं दर्पणं च सुरेश्वर!॥
व्यजनम्, आभूषणानि, छत्राणि च। इदं विष्णुरिति॥
चामरम्—शशाङ्ककरसंकाशं हेमडिण्डिमपाण्डुर। प्रोत्सारयाशु दुरितं चामरामरवल्लभ!॥
नमस्कारः—नमः सर्वहितार्थाय जगदाधारहेतवे। साष्टाङ्गोऽयं प्रणामस्तु प्रयत्नेन मया कृतः॥
प्रदक्षिणा—अनेकजन्मस्वपि तत्कृतानि पापानि सर्वाण्यपि यानि कानि।
नाशं प्रयान्त्वद्य हि तानि देव! प्रदक्षिणाभिस्तु भवत्कृताभिः॥
यानि कानि च पापानि ब्रह्महत्या शतानि च। तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे॥
नीराजनम्—दीपावलीं मया दत्तां गृहाण परमेश्वर! आरार्तिक्यप्रदानेन मम तेजःप्रदो भव॥

मूलमन्त्रस्तोत्रादिपाठः। गृह्यतामिति। पुष्पाञ्जलिः—

नमो नमस्ते गोविन्द नमस्ते अमरप्रिय! पुष्पाञ्जलिर्मया दत्ता गृहाण परमेश्वर!॥

क्षमापनम्—मन्त्रहीनं क्रियाहीनं विधिहीनं च यद्भवेत्। तत्सर्वं क्षम्यतां विष्णो प्रसीद करुणानिधे॥

अज्ञानात् विस्मृतो भ्रान्त्या यन्न्यूनमधिकं कृतम्। विपरीतं तु तत्सर्वं क्षमस्व परमेश्वर!॥

विशेषार्घम्—शंखे रौप्यपात्रे वा फलं चन्दनं पुष्पं दधि दूर्वाक्षतादीनि क्षिप्त्वा—

फलान्नं चैव शुभ्रं च भक्तियुक्तेन चेतसा। गृहाणर्घ्यमिमं देव लक्ष्म्या सह जगद्गुरो!॥

एषोऽर्घः समर्पयामि लक्ष्मीसहित नारायणाय नमः। अमुकनाम्न्यै एकादश्यै नमः॥

अनेनैव विधिना चन्द्रार्घदानम्—

अत्रिनेत्रसमुद्भूतं क्षीरोदार्णवसम्भव। गृहाणार्घ्यं मया दत्तं रोहिणीसहित प्रभो!॥

रात्रौ जागरणं कृत्वा प्रभाते विसर्जनम्—

आवाहनं न जानामि न जानामि विसर्जनम्। मन्त्र-पूजां न जानामि क्षमस्व परमेश्वर!॥

क्षमस्व देवदेवेश! नारायण सुरोत्तम! वरं देहि सुरश्रेष्ठ! दासोऽहं सर्वदा तव॥

धेनुमुद्रां प्रदर्श्य संहारमुद्रया पुष्पमीशाने प्रक्षिपेत्। नैवेद्यं किञ्चिदीशाने देयम्—निर्माल्यभोजीविष्वक्सेनाय नमः।

पूर्णपात्रदानम्—पूर्वोक्तसङ्कल्पमुच्चार्य। अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणो मम श्रुति-स्मृति-पुराणोक्तफलावाप्तये कृतैतद्दीप-कलश-गणेशपूजनपूर्वकं यथालब्धोपचारैरेकादश्यां तत्तद्देवता पूजनकर्मणः साङ्गतासिद्ध्यर्थं न्यूनातिरिक्तपरिपूर्णार्थं पूर्णपात्रं प्रजापति दैवताकं तत्तद्दैवतानि यथानामगोत्राय तुभ्यमहं सम्प्रददे आचार्याय दद्यात्॥

दानप्रार्थना—त्रैलोक्यनाथो देवेश शङ्ख-चक्र-गदाधर। दानेनानेन सुप्रीतः प्रसन्नो भव सर्वदा॥
यान्तु देवगणाः सर्वे पूजामादाय मामिकाम्। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च॥

दक्षिणा—अद्येत्यादि देशकालादि सङ्कीर्त्य अमुकगोत्रस्यामुकशर्मणा मम सकलजन्मोपार्जितपाप-क्षयार्थं श्रीलक्ष्मीनारायणप्रीतये श्रीविष्णुलोकवासकामनयाऽखण्डैकादशीकृतसोपवास-जागरण-पूर्वकं श्रीविष्णुपूजनकृतस्य यथोक्तफलावाप्तये सांगतासिद्ध्यर्थं अमुकद्रव्यममुकदैवताकं यथा-नामगोत्रायेत्यादि। कायेनवाचेति विसर्जयेत्। ततोऽभिषेकादिकं गृहीत्वा ब्राह्मणान् सन्तोषयेत्॥

इति श्रीपद्मपुराणोक्तमखण्डैकादशी-व्रतपूजाविधिः समाप्ता॥

एकादशी नियमविशेष पूजा प्रकारः

मार्गकृष्णे–उत्पत्ति नाम्नी एकादशी, कृष्णदामोदरो देवताशक्तिः शक्तिः, सुगन्धपुष्पमद्भुतफलार्घ्यम्, मोदकानि नैवेद्यम्, धान्यदानम् ॥१॥
मार्गशुक्ले–मुक्तिदा नाम्नी, केशवो देवता, विशालाक्षी शक्तिः, मालतीपुष्पम्, मुद्गललड्डुकनैवेद्यम्, नारंगीफलार्घ्यम्, सप्तधान्यदानम् ॥२॥
पौषकृष्णे–सफला नाम्नी, सङ्कर्षणो देवता, सुनन्दा शक्तिः, अगस्तिपुष्पम्, रम्भाफलार्घ्यम्, पक्वान्ननैवेद्यदानम् ॥३॥
पौषशुक्ले–पुत्रदा नाम्नी, नारायणो देवता, लक्ष्मीः शक्तिः, कुन्दपुष्प-दाडिमफलार्घ्यम्, चूर्णनैवेद्यम्, घृत-रौप्यदानम् ॥४॥
माघकृष्णे–षट्तिला नाम्नी, हरिर्देवता, श्रीः शक्तिः, कह्लारपुष्पम्, द्राक्षाफलार्घ्यम्, घृतपूप-नैवेद्यम्, दुग्धदानम्, तिलहोमः ॥५॥
माघशुक्ले–जया नाम्नी, माधवो देवता, रुक्मिणी शक्तिः, कुन्दपुष्पम्, बीजपूरफलार्घ्यम्, तिललड्डुकनैवेद्यम्, तिलधेनुदानं, ताम्रखंडदानम्॥६॥
फाल्गुनकृष्णे–विजया नाम्नी, अच्युतो देवता, धात्री शक्तिः, तुलसीपत्राणि, जम्बीरफलार्घ्यम्, खादिरनैवेद्यम्, पक्वान्नादिहोमः ॥७॥
फाल्गुनशुक्ले–आमलकी नाम्नी, गोविन्दो देवता, चण्डिका शक्तिः, , अक्रोडफलार्घ्यम्, चम्पकपुष्पम्, पूरिकानैवेद्यम् ॥८॥
चैत्रकृष्णे–पापमोच नाम्नी, अनिरुद्धो देवता, मित्रवृन्दा शक्तिः, कुन्दपुष्प-फलार्घ्यम्, वटकनैवेद्यम्, फलादिदानम् ॥९॥
चैत्रशुक्ले–कामदा नाम्नी, विष्णु देवता, आम्रमञ्जरीपुष्पं धात्रीपुष्प-पत्रं च, एकाफलार्घ्यम्, इक्षुरसनैवेद्यम्, इक्षुखण्डानि, सुगन्धिपुष्पदानम्॥१०॥
वैशाखकृष्णे–वरूथिनी नाम्नी, वासुदेवो देवता, शची शक्तिः, जातिफलार्घ्यम्, रुद्रपुष्पम्, सक्तुनैवेद्यम्, धौतोत्तरीयदानम् ॥११॥
वैशाखशुक्ले–मोहिनी नाम्नी, मधुसूदनो देवता, माधवी शक्तिः, दमनापुष्पम्, राजानकफलार्घ्यम्, गुलाबशर्करानैवेद्यम्, दुग्धदानम् ॥१२॥
ज्येष्ठकृष्णे–अपरा नाम्नी, प्रद्युम्नो देवता, कालिन्दी शक्तिः, बकुलपुष्पम्, कर्कटीफलेनार्घ्यम्, दुग्धनैवेद्यम्, श्वेतच्छत्रोपानहदानम् ॥१३॥

ज्येष्ठशुक्ले–निर्जला नाम्नी, त्रिविक्रमो देवता, पद्मा शक्तिः, भृङ्गराज पुष्पम्, आम्रफलार्घ्यम्, दधिभक्तनैवेद्यम्, जल-धेनुदानम् ॥१४॥
आषाढकृष्णे-योगिनी नाम्नी, नृसिंहो देवता, क्षेमकरी शक्तिः, जपापुष्पम्, करणफलार्घ्यम्, पायसनैवेद्यम्, ज्येष्ठिकाचन्दनं, तालव्यजनदानम्॥१५॥
शुक्ले–पद्मा नाम्नी, वामनो देवता, मनुमती शक्तिः, अपामार्गपुष्पं, नारिकेलफलार्घ्यं, पक्वान्ननैवेद्यं, आम्रफलदानं, तिलाज्यादिना होमः ॥१६॥
श्रावणकृष्णे-कामिका नाम्नी, पुरुषोत्तमो देवता, विजया शक्तिः, मल्लिकापुष्पं, बिल्वफलार्घ्यं, पूपनैवेद्यं, कांस्यपात्रस्थपूपदानं, मिष्टान्नभोजनम्॥१७॥
श्रावणशुक्ले–पुत्रदा नाम्नी, श्रीधरो देवता, मति-कान्ति शक्तिः, पनसपुष्पं पत्रं वा, पनसफलार्घ्यम्, मधुरनैवेद्यम्, ताम्बूलपूगीफलादिदानम्॥१८॥
भाद्रकृष्णे–अजा नाम्नी, अधोक्षजो देवता, रुक्मिणी शक्तिः, कुशपुष्पम्, कूष्माण्डफलार्घ्यम्, खाजानैवेद्यम्, घृतपात्रदानम् ॥१९॥
भाद्रशुक्ले–पद्मा नाम्नी, हृषीकेशो देवता, रतिकरी शक्तिः, कटलपुष्पम्, शष्कुलिनैवेद्यम्, कांस्यपात्रस्थितघृतदानम् ॥२०॥
आश्विनकृष्णे–इन्दिरा नाम्नी, जनार्दनो देवता, सुप्रभा शक्तिः, दूर्वाङ्कुरपुष्पम्, धात्रीफलार्घ्यम्, मिष्टफलादिनैवेद्यम्, सक्तुदानं गोदानम् ॥२१॥
शुक्ले–पापाङ्कुशा नाम्नी, पद्मनाभो देवता, पद्मा शक्तिः, शमीपत्रपुष्पं, कमलपुष्पं वा फलार्घ्यं, कदलीनैवेद्यं, पीतलड्डुकनैवेद्यं, वस्त्रदानम् ॥२२॥
कार्तिककृष्णे–रमा नाम्नी, श्रीकृष्णो देवता, सत्यभामा शक्तिः, नागकेशरपुष्पम्, अमृतफलार्घ्यम्, मुद्गललड्डुकनैवेद्यम्, गुडधेनुदानम् ॥२३॥
कार्तिकशुक्ले–हरिबोधिनी नाम्नी, दामोदरो देवता, राधा शक्तिः, शतपत्रपुष्पम्, बदरिनैवेद्यम्, दारिकाफलार्घ्यम्, दीपाहोमः (?)
तिलपायसैः, सोपस्करणशय्यादानादि, द्विजदम्पतीपूजनम्, गोदानम् ॥२४॥

इति सामान्यैकादशीपूजाविधिः ॥

★

शीतलार्चनविधिः

कृतनित्यक्रियः शुचिराचान्तः पूजास्थले गोमयोदकेन भूम्युपलिप्य तत्र शुद्धासने प्राङ्मुखोपविश्य दीपं प्रज्वाल्य आचम्य प्राणानायम्य देशकालौ स्मृत्वाऽमुकस्य शीतलोपद्रवनिवृत्तिपूर्वकायुरारोग्यसिद्ध्यर्थं श्री शीतलादेव्याः स्थापनं पूजनं चाहं करिष्ये ।—सङ्कल्पः । दीपं गणेशं च सम्पूज्य धान्यराशौ निर्व्रणं तैजसं कलशं कलशस्थापनविधिना संस्थाप्य वक्ष्यमाणनवार्णवमन्त्रेण द्वादशवारमभिमन्त्र्य तदुपरि ताम्रस्थाल्यां चन्दनादिना चतुर्द्वारयुतं त्रिकोणं यन्त्रं लिखित्वा तन्मध्ये पञ्चगव्यप्रोक्षणेन संस्कृतां प्रतिमां मूलमन्त्रेण स्थापयित्वा प्राणप्रतिष्ठां कुर्यात् । कलशसमीपे मार्जनीं सूर्पं च स्थापयेत् ॥ अर्चनविधिनाचम्य अर्घ्यं संस्थाप्य ॐ ह्रीं श्रीशीतलायै नमः इति नवाक्षरमन्त्रेण प्राणायामत्रयं कृत्वा—ॐ अस्य श्री शीतला मन्त्रस्य उपमन्यु ऋषिर्बृहती छन्दः श्रीशीतला देवताऽमुकस्य (मम) श्रीशीतलोपद्रवनिवृत्तिपूर्वकायुरारोग्यसिद्ध्यर्थं श्रीशीतलार्चने विनियोगः ॥

न्यासः—शिरसि उपमन्यु ऋषये नमः । मुखे बृहतीछन्दसे नमः । हृदि श्रीशीतलादेवतायै नमः । ॐ

ह्रां श्रीं अंगुष्ठाभ्यां नमः । ह्रीं श्रीं तर्जनीभ्यां नमः । ह्रूं श्रीं मध्यमाभ्यां नमः । ह्रैं श्रीं अनामिकाभ्यां नमः। ह्रौं श्रीं कनिष्ठिकाभ्यां नमः। ह्रः श्रीं करतलकरपृष्ठाभ्यां नमः। ह्रां श्रीं हृदयाय नमः । ह्रीं श्रीं शिरसे स्वाहा । ह्रूं श्रीं शिखायै वषट् । ह्रैं श्रीं कवचाय हुम् । ह्रौं श्रीं नेत्रत्रयाय वौषट् । ह्रः श्रीं अस्त्राय फट् ॥

ध्यानम्—ध्यायेच्च शीतलां देवीं रासभस्थां दिगम्बराम् । मार्जनीशूर्पहस्तां च रक्तपुष्पहितार्चिताम् ॥ तैलादिमलसंयुक्तां वस्त्रपौटलिशीर्षकाम् ॥ मानसोपचारैः सम्पूज्य पुष्पाञ्जलिं गृहीत्वा वामनासिकाविवरात् निःसार्य पुष्पाञ्जलिर्भ्रामयित्वा पुष्पाञ्जलिं प्रतिमायां स्थापयेत् ॥ ततो मूलमन्त्रेणावाहनम् । आसनम् । पाद्यम् । अर्घ्यम् । आचमनीयम् । पुनराचमनीयम् । वस्त्रयुग्मम् । सिन्दूरादिशृङ्गारद्रव्यम् । भूषणम् । चन्दनम् । अक्षताः । पुष्पाणि अर्पयित्वा पुष्पाञ्जलित्रयं देव्याः आग्नेयादिचतुष्कोणेषु मध्ये दिक्षु च अङ्गानि सम्पूज्य, पूर्वकोणे ॐ कोद्रवायै नमः ॥१॥ दक्षिणकोणे ॐ मसूरिकायै नमः ॥२॥ वायव्यकोणे ॐ सराविकायै नमः ॥३॥ आवरणपूजा—भूपुरे। पूर्वाद्यष्टदिक्षु ॐ असिताङ्गभैरवाय नमः। ॐ रुरुभैरवाय० । ॐ चण्डभैरवाय० । ॐ क्रोधभैरवाय० । ॐ उन्मत्तभैरवाय० । ॐ कपालभैरवाय०

ॐ भीमभैरवाय०। ॐ संहारभैरवाय नमः।

पुष्पोदकम्—अभीष्टसिद्धिं मे देहि शरणागतवत्सले! भक्त्या समर्पये तुभ्यमिदमावरणार्चनम्॥

धूपम्, दीपम्, नैवेद्यम्, फलम्, सुगन्ध-ताम्बूलोपायनश्रीफलादिनैवेद्यानि समर्प्य नीराजनं कृत्वा॥

पुष्पाञ्जलिः—शीतले त्वं जगन्माता शीतले त्वं जगत्पिता। शीतले त्वं जगद्धात्रि! शीतलायै नमो नमः॥

अष्टोत्तरसहस्रं अष्टोत्तरशतं वा मूलमन्त्रं जपेत्॥

जपनिवेदनम्—गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादात्महेश्वरि॥

शीतले! देवदेवेशि! सर्वोपद्रवनाशिनि! त्राहि मां गिरिजे मातर्विस्फोटकभयार्दिते!॥

शतकृत्वो दशकृत्वो वा स्कन्दपुराणोक्तं शीतलाष्टकं पठित्वा—

प्रार्थना—शीतले त्वं जगद्धात्री शीतले! भक्तवत्सले! शीतले! देवि! देवेशि! प्रसन्ना भव सर्वदा॥

मार्जन्यग्रेण किञ्चित्कुशोदकं गृहीत्वा मूलमन्त्रं पठेत्। दूरं न गच्छेत् उच्छिष्टादिकं न प्रवेशयेत्। पूजनजपपाठश्च कर्त्तव्यः। अवसाने दिने शीतलिनं स्नापयित्वा महती पूजा कार्या॥ इति शीतलार्चनविधिः समाप्तः॥

*

मैत्रीकरणविधिः

युधिष्ठिर उवाच—मित्राचारविधानं मे ब्रूहि यत्नेन केशव ! केन साकं प्रकर्तव्यं विधानं किं समित्रकम् ॥
श्रीकृष्ण उवाच—सवर्णिनं कुलीनं च सुरूपं शीलसंयुतम् । धर्मज्ञं शास्त्रवेत्तारं राजलोकानुरञ्जनम् ॥
सुभगं कीर्तिमन्तं च सर्वज्ञं मित्रवत्सलम् । स्वकुलाचारनिपुणं मित्रं कुर्यात् तु पाण्डव ! ॥
अकुलीनं शठं मूर्खं कुरूपं क्रोधसंयुतम् । पापं व्यसनिनं दुष्टं लोभिनं धर्मवर्जितम् ॥
वाचालमपवाचालं पिशुनं द्यूतकारकम् । विरुद्धं सर्वलोकानां वर्जयेत् पाण्डुनन्दन ! ॥
युधिष्ठिर उवाच—श्रुतं मया तव प्रोक्तं मित्राचारस्य लक्षणम् । कृपया वद मे कृष्ण ! कालं मित्रविधानकम् ॥
श्रीकृष्ण उवाच—ग्रहणे चन्द्र-सूर्यस्य देवस्थल – सरित्तटे । गङ्गा-यमुनयोर्मध्ये सरस्वत्यादिसङ्गमे ॥
सोत्साहौ चोभयौ प्रीतौ देहरक्षणकारकौ । पात्रार्थे देशकार्ये च वामार्थे नगरार्थिनः ॥
अथवा प्रार्थिताकारि मित्र त्वं यदि दीयते ॥

पुण्यक्षेत्रे कृतनित्यक्रियौ पूर्वाभिमुखौ शुद्धासनस्थौ प्रतिज्ञासङ्कल्पः—ॐ अद्येत्यादि देशकालौ संकीर्त्य अमुकाऽमुकगोत्रयोः अमुकाऽमुकशर्मणोरेकपिण्डित्वकरणमित्राचारकर्मणि तदङ्गतया दीपकलश-गणेशपूजनपूर्वक-हरिहरपूजनमावां करिष्यावहे, पुण्याहवाचनमावां च करिष्यावहे । ततः मित्राभ्यां पूज्याः ॥ अथ उत्तराभिमुखौ साञ्जलिस्थितौ भवतः ॥ तत्राञ्जलिं बध्वा, आराधनम्—

ब्रह्मविष्णोर्यथाप्रीती रामलक्ष्मणयोर्यथा। तथैव आवयोः प्रीतिर्मिथः स्यादनपायिनी ॥
ग्रन्थिनो बलबन्धेन लक्ष्मीरायुश्च वर्धताम् ॥

कलशपूजा, तद्विधिना सम्पूज्य लोकविशेषश्रेष्ठाचारात्। दीपकलशयोर्मध्ये स्थाल्यादौ हरिहरयोः पूजा च ॥

आवाहनादि उपायननैवेद्यान्तं कृत्वा प्रार्थना—

रूपं देहि जयं देहि यशो देहि प्रविस्तरम्। राज्यं च विपुलं देहि सर्वदा मम केशव ! ॥
वरुणं देवदेवेशमाधारं सर्वजीविनाम्। त्वां पूजयावः कलशं सुप्रीतो भव कर्मणि ॥
यावज्जीवं सुखं देहि मित्रकर्मणि सुप्रभ। आवयोरचलां प्रीतिं सर्वदा देह्यपाम्पते ॥

ततो दूर्वावण्ठनम् (?)। समूलां चतुर्दशसंख्याकां दूर्वां समानीय सप्तसप्तदूर्वाः साक्षता उभाभ्यां गृहीत्वा—

आयुर्वृद्धिकरी दूर्वावण्ठनैर्मित्रबन्धनैः। आयुरारोग्यमैश्वर्यं मित्रे भवतु सर्वदा ॥

प्रदक्षिणा—पश्यन्तु देवताः सर्वा अस्माकं मित्रकर्मणि। रूपं देहि जयं देहि सुखं देहि प्रतिक्षणम् ॥
मित्राचारवशं यातं मित्रं-मित्रं मिथो वदेत्। एकं पिण्डं द्विधादेहमद्य प्रभृति भो द्विज ! ॥

ततः परस्परमालिङ्गनं कुर्यात्। नानावस्त्रं भूषणादिकं परस्परमित्राभ्यां दद्यात् ॥ विप्रेभ्यो दक्षिणां दद्यात् ॥

श्रेष्ठाचार्याय सङ्कल्प्य वस्त्र-भू गो-हिरण्यादिकं देयम् ॥ तत्र पूर्ववत्सङ्कल्पं विधाय—अद्य एतन्मित्र-कर्माभिलषितप्राप्तिकाम इमां गां सवत्सां सालङ्कारां रुद्रदैवतां अमुकगोत्रायामुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे ॥ गोरभावे तन्मूल्योपकल्पितां दक्षिणां दद्याताम् ॥ गोचरादि दुष्टग्रहाणां च दानं दद्यात् । ततो ब्राह्मणानां मन्त्राशिषं गृह्णीयात् ॥

अभीष्टमित्रकार्येषु व्यासवाक्यं च कारयेत् । भक्ष्यभोज्यादिकं देयं कुटुम्बाय परस्परम् ॥

आशीर्वचनम्—यावद् गङ्गा हरि-हर-धरा व्योम्नि सोमार्क-देवौ,
यावद् गौरी - दहनपवनाः सागरेऽप्यस्ति चाम्बु ॥
यावन् मेरुप्रभृतिगिरयो कूर्मशेषा धरित्री
तावन् मैत्री भवतु भवतां निश्चला दीर्घमायुः ॥

इति श्रीकृष्ण-युधिष्ठिरसंवादे मैत्रीकरणविधिः समाप्ता ।

★

अगस्त्यर्घविधिः

सङ्कल्पः—पूर्वसङ्कल्पसिद्धिरस्तु अद्येह अगस्तिपूजनपूर्वकागस्त्यर्घदानमहं करिष्ये। दीप-कलश-गणेशपू०

आवाहनम्—आगच्छ मुनिशार्दूल तेजोराशे महामुने! इमां मया कृतां पूजां गृहीत्वा मुनिपुङ्गव ॥

भो अगस्ते! इहागच्छेह तिष्ठ। पाद्यादि अगस्तये नमः इदमनुलेपनादि धूपादि द्रव्यमगस्तये०।

पुष्पाञ्जलिः—काशपुष्पप्रतिकाश अग्निमारुतसम्भव! मित्रावरुणयो पुत्र कुम्भयोने! नमोऽस्तु ते॥

अर्घ्यम्—विन्ध्यवृद्धिक्षयकर मेघतोयविषापह। रत्नवल्लभदेवेश लङ्कावास नमोऽस्तु ते॥

वातापी भक्षितो येन समुद्रः शोषितः पुरा। लोपामुद्रापतिः श्रीमान् योऽसौ तस्मै नमो नमः॥

येनोदितेन पापानि विलयं यान्ति व्याधयः। तस्मै नमोस्त्वगस्त्याय सशिष्याय च पुत्रिणे॥

अगस्त्याय नमो नमः प्रोक्त्वार्घ्यं निवेदयेत्—

राजपुत्रि महाभागे! ऋषिपत्नि वरानने। लोपामुद्रे नमस्तुभ्यमर्घ्यं ते प्रतिगृह्यताम्॥[१]

अंजलिं बध्वा—अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये। ऐहिकामुष्मिकीं दत्वा कार्यसिद्धिं व्रजस्व मे॥

शोकसन्तापहर्ता च दुःखदारिद्र्यनाशनः। इदमर्घ्यं मया दत्तमगस्त्यं प्रणमाम्यहम्॥ इति॥

१—दत्त्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जयेत्।

भौमव्रत-पूजाविधिः

मार्गशीर्षेऽथ वैशाखे भौमदिने व्रतप्रारम्भः। अतिभौमारुणोदयवेलायां उत्थायाऽऽवश्यकीं क्रियां कृत्वा। मौनी अपामार्गकाष्ठैर्दन्तधावनं विधाय आचम्य नद्यादिषु स्नात्वा रक्तवस्त्रं परिधाय सन्ध्यादि नित्यकर्माणि विधाय 'भौमाय नमः' भौमायाञ्जलित्रयं दत्वा वेदविधिज्ञं ब्राह्मणमाहूय तदाज्ञया भौममर्चयेत्॥ रक्तवर्णगोगोमयेन भूमिं विलिप्य रक्तासनमास्तीर्य पूर्वाभिमुखः जलसेचनम्—

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरुचासनम्॥
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिता। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥
अपक्रामन्तु भूतादि पिशाचाः सर्वतोदिशम्। सर्वेषामविरोधेन ब्रह्म कर्म समारभे॥
देवा इहाऽऽयान्तु। यातुधाना अपयान्तु। विष्णो देवयजनं रक्षस्व।

आचम्य प्राणानायम्य एवं गुण इत्यादि अमुकतिथौ अमुकगोत्रस्य अमुकराशे अमुकशर्मणो मम समस्त दुरितक्षयद्वारा ऋणपरिहारार्थं लक्ष्मीप्राप्त्यर्थं भौमव्रतमहं करिष्ये। तदङ्गकलशाराधनं गणा-

धिपतिपूजनं च करिष्ये। दीपं प्रज्वाल्य रक्तवर्णद्वादशशक्तिसहिताय दीपनारायणाय नमः॥
नमोऽस्त्वनन्तायेति सम्पूज्य कलशे गन्धपुष्पाक्षतैरभ्यर्च्य वरुणमावाह्य तत्त्वायामीति सम्पूज्य॥
मत्स्यमुद्रयावच्छाद्य धेनुमुद्रां प्रदर्श्य पूजाद्रव्याणि आत्मानं च सम्प्रोक्ष्य, घण्टावादनम्—
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्। कुर्याद् घण्टारवं तत्र देवतानां समीपतः॥

प्राणप्रतिष्ठापनम्—ॐ अस्य श्रीअङ्गारक प्राणप्रतिष्ठा महामन्त्रस्य ब्रह्म-विष्णु-रुद्रा ऋषय ऋग्यजुः सामाथर्वाणिच्छन्दांसि प्राणाः शक्तिः परमो देवता ह्रां बीजं ह्रीं शक्तिः क्रीं कीलकम् अङ्गारक प्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः॥

न्यासः—ॐ ह्रां अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां नमः। ह्रूँ मध्यमाभ्यां नमः। ह्रैं अनामिकाभ्यां नमः। ह्रौं कनिष्ठिकाभ्यां नमः। ह्रः करतलकरपृष्ठाभ्यां नमः। एवं हृदयादि न्यासः॥

ध्यानम्—रक्ताम्भोधिस्थपीतोल्लसदरुणसरोजाधिरूढो कराब्जैः।
शूलं कोदण्डमिक्षूद्भवमणिगुणमप्यङ्कुशं पञ्चबाणान्॥

बिभ्राणासृक्कपालं त्रिनयनलसितापानवक्षोरुहाढ्या ।
देवीबालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

ॐ ह्रां ह्रीं क्रौं यं रं लं वं शं षं लँ हँ क्षँ सः अङ्गारक प्राणा इह प्राणाः । ऱ्हां इत्यादि अङ्गारक जीव इह तिष्ठ । ऱ्हां इत्यादि अङ्गारकस्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुः श्रोत्र-जिह्वा-घ्राणानीहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा अमृतं वै प्राणा अमृतमापः प्राणाश्चैव । यथास्थानमुपह्वमते । अश्रुतीते पुनरस्मासुश्चक्षुः पुनर्घ्राणमिहनोधेहि भोगम् ॥ ॐ पश्येमसूर्यमुच्चरन्तमनुमतेमृळायान स्वस्ति० ॥ अङ्गारकं रक्तवर्णं रक्तमाल्याम्बरधरं रक्तगन्धानुलेपनं रक्तपुष्पं रक्तछत्रं ध्वजरथं पताकाशोभितदिव्यरथसमारूढं मेरुप्रदक्षिणां कुर्वाणं भारद्वाजगोत्रं अवन्तिदेशीयं प्रवालाभरण भूषितं गोधूमधान्यं सांगं सायुधं सवाहनं सशक्तिं सपत्नीकं सपरिवारमधिदेवता-प्रत्यधिदेवता-सहितं (?) अस्यामत्र प्रतिमायामावाहये इहागच्छेह तिष्ठ ममाभिमुखो भव, आवाहितो भव, स्थापितो भव, सन्निहितो भव, संनिरुद्धो भव, अवगुण्ठितो भव, माममीष्टदो भव ।

ध्यानम्—जवाकुसुमसङ्काशं शक्तिशूलं गदाधरम् । मेषसंस्थं रक्तवस्त्रं तं वन्देऽहं धरात्मजम् ॥

अद्य ते देवदेवेश! करिष्ये व्रतमुत्तमम्। दुःखदारिद्र्यनाशाय पुत्रसन्तानहेतवे ॥
भौमं सम्प्रार्थ्य अस्य भौममन्त्रस्य विरूपाक्ष ऋषिः गायत्रीछन्दः अङ्गारको देवता ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ विरूपाक्षऋषये नमः शिरसि। ॐ गायत्रीछन्दसे नमः मुखे। ॐ मङ्गलदेवाय नमः हृदये। ॐ अः अंगुष्ठाभ्यां नमः। ॐ ऱ्हां तर्जनीभ्यां स्वाहा। ॐ ऱ्हं मध्यमाभ्यां वषट्। ॐ सः अनामिकाभ्यां हुँ। ॐ कनिष्ठिकाभ्यां वौषट्। ॐ करतलकरपृष्ठाभ्यां फट् ॥
एवं हृदयादिन्यासः—ॐ मङ्गलाय नमः पादयोः। ॐ भूमिपुत्राय नमः जानुनोः। ॐ ऋणहर्त्रे नमः ऊर्वोः। ॐ धनप्रदाय नमः कट्याम्। ॐ स्थिरासनाय नमः गुह्ये। ॐ महाकालाय नमः हृदये। ॐ सर्वकर्माविरोधकाय नमः वामबाहौ। ॐ लोहिताय नमः दक्षिणबाहौ। ॐ लोहिताक्षाय नमः गले। ॐ सामगानां कृपाकराय नमः मुखे। ॐ धरात्मजाय नमः नासिकायाम्। ॐ कुजाय नमः नेत्राभ्याम्। ॐ भौमाय नमः ललाटे। ॐ भूमिदाय नमः भ्रुवोर्मध्ये। ॐ भूमिनन्दनाय नमः मस्तके। ॐ अंगारकाय नमः शिखायाम्। ॐ यमाय नमः सर्वशरीरे। ॐ सर्वरोगापहारकाय नमः स्तनद्वये। ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यन्तम्। ॐ वृष्टिहर्त्रे नमः चरणादि मूर्द्धान्तम्। ॐ सर्व-

कामफलप्रदाय नमः सर्वदिक्षु । ॐ आराय नमः नाभौ । ॐ वक्राय नमः वक्षसि । ॐ भूमिजाय नमः मस्तके । हाँ हँ सः षं ख इति व्यापकं कुर्यात् ।

ध्यानम्—जयार्थं शिवं स्वेदजं हस्तपद्मे गदां मूलशक्तिं वरं धारयन्तम् ।
अवन्तीसमुत्थं शुभस्थानसंस्थं धरानन्दनं रक्तवस्त्रं समीडे ॥
अरुणमरुणवर्णं रक्तमाल्याङ्गरागं कनककमलमालामालिनं विश्ववन्द्यम् ।
अतिललितकराभ्यां बिभ्रतं शक्तिकोणं गणपतिमभिवन्दे मूषके संवसन्तम् ॥

ताम्रमयं गाण्यपत्यमूर्तिं संस्थाप्य मूलेनानेन देवमावाह्य—

एह्येहि भगवन् भौम अङ्गारक ! इह प्रभो ! त्वयि सर्वं समायातं त्रैलोक्यं च चराचरम् ॥
भौममावाहयिष्यामि तेजोमूर्तिं दुरासदम् । रुद्ररूपमनिर्देश्यं वक्त्रं च रुधिरप्रियम् ॥

अग्निमूर्धेति मन्त्रेण गायत्र्या मङ्गलस्य वा ॥

ॐ अङ्गारकाय विद्महे शक्तिहस्ताय धीमहि । तन्नो भौमः प्रचोदयात् ॥ अर्घ्यमादाय तन्नामभिर्द्वाविंशतिकोष्ठेषु पूजयेत् ॥ आवाहनम् । आसनम् । पाद्यम् । अर्घ्यम् । आचमनीयम् । पञ्चामृतस्नानम् ।

प्रतिष्ठापनम्—ॐ मङ्गलाय नमः पादौ पूजयामि। ॐ भूमिपुत्राय नमः जानुनी०। ॐ ऋणहर्त्रे नमः नाभिं०। ॐ धनप्रदाय नमः कटिं०। ॐ स्थिरासनाय नमः ऊरू०। ॐ महाकालाय नमः उरः०। ॐ सर्वकर्माविरोधकाय नमः बाहू०। ॐ लोहिताय नमः स्कन्धौ०। ॐ लोहिताक्षाय नमः कण्ठं०। ॐ सामगानां कृपाकराय नमः मुखं०। ॐ धरात्मजाय नमः नासिकां०। ॐ कुजाय नमः अक्षिणी०। ॐ भौमाय नमः ललाटं०। ॐ भूतिदाय नमः भ्रुवोर्मध्यं०। ॐ भूमिनन्दनाय नमः मस्तकं०। ॐ अङ्गारकाय नमः शिखां०। ॐ यमाय नमः सर्वाङ्गं०। ॐ सर्वरोगहराय नमः बाहुद्वयं०। ॐ वृष्टिकर्त्रे नमः मूर्द्धादिपादपर्यन्तं०। ॐ वृष्टिहर्त्रे नमः चरणादिमस्तकपर्यन्तं०। ॐ सर्वकामफलप्रदाय नमः दिशं पूजयामि। इति सम्पूज्य॥ इन्द्रादीन् संपूज्य—इन्द्र इहागच्छ इह तिष्ठ। पूर्वे—इन्द्राय नमः। वज्रायुधसहिताय नमः। आवाहयामि॥ आग्नेये—अग्ने! इहागच्छ इह तिष्ठ। शक्त्यायुधसहिताय नमः। दक्षिणे—यम! इहागच्छेह तिष्ठ। यमाय नमः। दण्डायुधसहिताय नमः। नैर्ऋत्ये—निर्ऋते! इहागच्छ इह तिष्ठ। खड्गायुधसहिताय नमः। पश्चिमे—वरुण! इहागच्छेह तिष्ठ! वरुणाय नमः। पाशायुधसहिताय नमः। वायव्ये—वायो!

इहागच्छेह तिष्ठ। अंकुशायुधसहिताय नमः। उत्तरे—कुबेर! इहागच्छेह तिष्ठ। गदायुधसहिताय नमः। ईशाने—ईशान! इहागच्छेह तिष्ठ। त्रिशूलायुधसहिताय नमः। ईशान-पूर्वयोर्मध्ये—ब्रह्म! इहागच्छेह तिष्ठ। अब्जायुधसहिताय ब्रह्मणे नमः॥ पूर्वे—ब्राह्मीमावाहयामि। पश्चिमे—वाराही-मावाहयामि। वा०—इन्द्राणीमावाहयामि। उ०—चामुण्डामावाहयामि। ई०—महालक्ष्मी-मावाहयामि॥ अङ्गारकाय वस्त्र-यज्ञोपवीत-आभूषण-गन्ध-पुष्पाक्षत-धूप-दीप-नैवेद्य-फल-ताम्बूल-कर्पूर-नीराजन-दक्षिणा-पुष्पाणि समर्पयेत्॥ ॐ अस्य अंगारकस्तोत्रमन्त्रस्य विरूपाक्ष ऋषिः त्रिष्टुप्छन्दो मंगलो देवता विष्णुः शक्तिः भौमप्रीत्यर्थे स्तोत्रपाठे विनियोगः॥

स्तुतिः—मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः। स्थिरासनो महाकायः सर्वकर्माविरोधकः॥१॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः। धरात्मजो कुजो भौमो भूमिदो भूमिनन्दनः॥२॥
अंगारको यमश्चैव सर्वरोगापहारकः। वृष्टेः कर्तापहर्ता च सर्वकामफलप्रदः॥३॥
एतानि कुजनामानि नित्यं यः प्रयतः पठेत्। ऋणं न जायते तस्य सन्तानं वर्द्धते सदा॥४॥
द्वाविंशतिश्च नामानि पठितानि दिनान्तके। रूपवान् धनवाँश्चैव जायते नात्रसंशयः॥५॥

एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः । एवं कृते न सन्देहो ऋणं हित्वा सुखी भवेत् ॥६॥

ताम्रपात्रे जलं सम्पूर्य रक्तपुष्पाक्षतफलानि निक्षिप्य अर्घ्यं दद्यात्—

भूमिपुत्रमहातेजः श्वेतध्वज पिनाकिनः । सुतार्थिनि प्रसन्नस्त्वं गृहाणार्घ्यं नमोऽस्तु ते ॥
रक्तप्रवालसंकाश जपाकुसुमसम्भव ! महीसुत महाबाहो गृहाणार्घ्यं नमोऽस्तु ते ॥

द्वाविंशतिनामभिः नमस्कारान् कुर्यात् ॥ पुष्पाञ्जलिः—

धरणीगर्भसम्भूतं विद्युत्काञ्चनसन्निभम् । कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥

प्रणम्य स्ववामभागे रेखात्रयं कृत्वा वामपादेन मार्जयेत्—

खादिराङ्गारकेणाथ कुर्यात् रेखात्रयं समम् । वामपादेन मन्त्राभ्यामेताभ्यां तत्प्रमार्जयेत् ॥

दुःख-दौर्भाग्यनाशाय पुत्र-सन्तानहेतवे । कृतरेखात्रये वामपादेनैव प्रमार्जये ॥
ऋणदुःखविनाशाय मनोऽभीष्टार्थसिद्धये । मार्जयामि सितां रेखां त्रिषु जन्मसुखोद्भवः ॥
धरणीगर्भसम्भूतं विद्युत्तेजसमप्रभम् । कुमारं शक्तिहस्तं च मङ्गलं प्रणमाम्यहम् ॥
ऋणहर्त्रे मनस्तुभ्यं दुःखदारिद्र्यनाशिने । नमसि द्योतमानाय सर्वकल्याणकारिणे ॥

देव-दानव-गन्धर्वाः यक्ष-राक्षस-पन्नगाः । सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥
यो वक्रगतिमापन्नो नृणां दुःखं प्रयच्छति । पूजितः सुखसौभाग्यं दाता तस्मै नमो नमः ॥
प्रसादं कुरु मे नाथ मङ्गलप्रद मङ्गल ! सर्वमंगलरुद्रात्मन् पुत्रान् देहि धनं यशः ॥

एवं सम्पूज्य संस्तुत्य गृह्णीयात् ब्राह्मणाशिषः । गुरवे दक्षिणां दत्वा भुञ्जीतान्नं निवेदितम् ॥

ब्राह्मणाय वायनं दद्यात् ॥ कृतस्य मङ्गलव्रतसाङ्गतासिध्यर्थं द्वाविंशतिलड्डूकदानम्—अमुकगोत्रायामुक-शर्मणे ब्राह्मणाय श्रीमङ्गलप्रीतिकामो वायनं तुभ्यमहं सम्प्रददे न मम ॥

वायनम्—मंगलाय नमस्तुभ्यं सर्वमंगलकारक ! वायनेन च सन्तुष्टो कुरु त्वं मे मनोरथम् ॥

दानसांगतासिध्यर्थं यथाशक्तिदक्षिणादानं तुभ्यमहं सम्प्रददे ।

आवाहनं न जानामि न जानामि विसर्जनम् । पूजाभावं न जानामि त्वं गतिर्धरणीसुत ! ॥

पुनः पूजां च करिष्ये । छत्रं चामरं नृत्यं गीतं अश्वं गजं आन्दोलिकां समस्तराजोपचारपूजां समर्पयामि ।

यस्य स्मृत्या च नामोक्त्या तपः पूजाक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं च यद्भवेत् । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥
अनेन भौमव्रतांगपूजनेन भगवान् सर्वात्मकः श्रीमानङ्गारकः प्रीयताम् ॥ इति भौमव्रतविधिः ॥

उद्यापनविधिः—व्रतप्रतिष्ठा

शुभदिने सम्भृतसकलसामग्रिको यथास्वं मण्डपादिकं निर्माय, मण्डपान्तरे ईशानप्रदेशे ग्रहवेदीं नैर्ऋत्ये वास्तुवेदीं मध्ये वेद्युत्तरे ततोऽग्निवेदीं च निर्माय सपत्नीको यजमानो भद्रङ्कर्णेभिरिति मन्त्रं पठन् मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य यदत्र संस्थितमिति, अपसर्पन्त्विति मन्त्रौ पठन् सर्षपादिविकिरणेन भूतानुत्सार्य मृगचर्माद्यन्यतमे शुभासने उपविश्याचम्य प्रायश्चित्तगोदानम्—अद्येत्यादितिथ्याद्युल्लेखनान्ते अमुकगोत्रः अमुकप्रवरः सपत्नीकोऽमुकशर्माहं मम सकलपापक्षयपूर्वक श्रुति-स्मृतिपुराणोक्तफलावाप्तये विशेषतः श्रीमल्लक्ष्मीनारायण उमामहेश्वरादिदेवताप्रीतये एतावत्कालपर्यन्तकृतानामुकनाम्न्यैकादश्यादिव्रतानां यथासादितसामग्र्या कर्तव्यं द्यापनकर्मणि सङ्कल्पाधिकारसिद्धिपूर्वकं एतत्स्थूलशरीरस्य विशुद्ध्यर्थं प्राजापत्याम्नायीभूतामिमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं रौप्यखण्डं चन्द्रदैवतं यथानाम गोत्राय तुभ्यमहं सम्प्रददे । प्रार्थना—कपिले सर्वदेवानामित्यादि ।

दानप्रतिष्ठा—अद्येत्यादिकृतैतत् गोनिष्क्रयीभूतरौप्यखण्डदानकर्मणः प्रतिष्ठासांगतासिद्धये दीयमानमिदं

ताम्रखण्डं सूर्यदैवतं यथानामगोत्राय तुभ्यमहं सम्प्रददे ।

प्रतिज्ञासङ्कल्पः—अद्येत्यादि देशकालाद्युल्लेखनान्तं अमुकगोत्रोऽमुकप्रवरशर्मा सपत्नीकोऽहं ज्ञाताज्ञातमनोवाक्कायसम्भूतमहापातकोपपातकनाशनपूर्वक-भय-रोग-शोक-दारिद्र्य-दौर्भाग्य-दुःख प्रोद्भूतोत्पात-वैकृत्यबाधाऽल्पमृत्युनाशनपूर्वकाक्षयविष्णुपुरवासकामो विशेषतः श्रुति-स्मृति-पुराणोक्त-फलावाप्तिपूर्वकं श्रीमल्लक्ष्मीनारायण-श्रीमदुमामहेश्वरप्रीतये एतावत्कालपर्यन्तानामेकादश्यादि व्रतानां यथोक्तफलावाप्तये यथासादितसामग्र्योद्यापनमहं करिष्ये। तदंगत्वेन दीप-कलश-गणेश पूजनपूर्वक-पुण्याहवाचन-मातृकापूजन-नान्दीश्राद्ध-ग्रहपूजन-सर्वतोभद्रपूजनं हवनं च ब्राह्मण-द्वाराहं कारयिष्ये ॥

ब्राह्मणवरणम्—अद्येत्यादिदेशकालोल्लेखनान्ते अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम ज्ञाताज्ञातमनोवाक्-कायसम्भूतमहापातकनाशनपूर्वक-भय-रोग-शोक-दारिद्र्य-दौर्भाग्य-दुःख-प्रोद्भूतोत्पात-वैकृत्य-बाधाल्पमृत्युविनाशनपूर्वकाक्षयविष्णुपुरवासकामो विशेषतः श्रुति-स्मृति-पुराणोक्तफलावाप्ति-पूर्वक-श्रीमल्लक्ष्मीनारायण-श्रीमदुमामहेश्वरप्रीतये एतावत्-कालपर्यन्तानामेकादश्यादिव्रतानां

यथोक्तफलावाप्तये यथासादितसामग्रिणोद्यापनमहं करिष्ये, तत्करणाय नाना शर्मणो ब्राह्मणानेभिः चन्दन-पुष्पाक्षत-धौतोत्तरीय-स्वर्णाङ्गुलीयासन-जलपात्रादिभिराचार्य-ऋत्विक्-द्वारपाल-गणपति-ब्रह्मात्वेन च युष्मानहं वृणे, 'ॐ वृतास्म' प्रतिवचनम् । ततः आचार्यादिभ्यस्तिलकम् ॥

पुण्याहवाचनम्–वस्त्र-गन्ध-पुष्पाक्षत-दूर्वा-पूंगीफलादिभिश्चतुरः पञ्च वा ब्राह्मणान् वृत्वा अद्येत्यादि तिथ्याद्युल्लेखान्ते अमुकप्रवरोऽमुकशर्मा सपत्नीकोऽहं परमेश्वरप्रीतये एतावत्कालपर्यन्तकृतानामेकादश्यादिव्रतानामुद्यापनकर्मणि मम गृहे भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३ ॐ पुण्याहमिति ३ प्रतिवचनम्। ॐ पुनन्तुमेति पठेत् । ॐ अद्य कल्याणं भवन्तो ब्रुवन्तु ३ ॐ कल्याणमिति ३ प्र० । ॐ यथेमांवाचमिति पठेत् । ॐ अद्य श्रियं भवन्तो ब्रुवन्तु ३ ॐ श्रीः इति त्रिः प्र० । ॐ मनसेति पठेत् । ॐ स्वस्तिर्भवन्तो ब्रुवन्तु ३ ॐ स्वस्ति इति त्रिः प्रतिब्रूयुः । ॐ स्वस्तिनऽइन्द्र इति पठेत् । ॐ अद्य शान्तिर्भवन्तो ब्रुवन्तु ३। ॐ शान्ति इति त्रिः प्र०। ॐ द्यौः शान्तिरिति पठेत् । ॐ पुण्याहवाचनं शुभमस्तु इति ब्राह्मणा ब्रूयुः । ततः आचार्यो दीप-कलश-गणेशान् स्वस्वमन्त्रेण सम्पूज्य मण्डपपूजां ग्रहवास्तुपूजां च स्वस्वविधिना निर्वर्त्य ग्रहवास्त्वादीनां होमं च विधाय मध्यवेद्यां सर्वतोभद्रमण्डलं विलिखेत्।

तत्प्रकारः—प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः । खण्डेन्दुस्त्रिपदः कोणे शृंखला पञ्चभिः पदैः ॥
एकादशपदावल्ली भद्रं तु नवभिः पदैः । चतुर्विंशत्पदावापी परिधिर्विंशकैः पदैः ॥
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् । श्वेतेन्दुः शृंखलां कृष्णवर्णां नीलेन पूरयेत् ॥
भद्रारुणसितावापी परिधिः पीतवर्णकः । बाह्यान्तरदला श्वेता कर्णिका पीतवर्णिका । परिधावेष्टितं पद्मबाह्य सत्त्वं रजस्तमः ॥

इत्थं सर्वतोभद्रमण्डलं विलिख्य ततः पूजामारभेत् ॥ तन्मध्ये ब्रह्मयज्ञानमिति ब्रह्माणमुत्तरे ॥ आप्यायस्वेति सोममीशानमिति ईशाने ॥ पूर्वे त्रातारमिन्द्रमिति इन्द्रम् ॥ आग्नेये अग्निन्दूतमिति अग्निम् ॥ दक्षिणे यमायत्वेति यमम् ॥ नैर्ऋत्ये असुन्वन्तममिति निर्ऋतिम् ॥ पश्चिमे वरुणस्योत्तम्भनमिति वरुणम् वायव्याम् वायोयेते इति वायुम् ॥ वायु-सोमयोर्मध्ये सुगावोदेवा इति ध्रुवाद्यष्टवसून् ॥ सोमेशानयोर्मध्ये यऽएतावन्तश्चेति एकादशरुद्रान् ॥ ईशानेन्द्रयोर्मध्ये योदेवानामिति द्वादशादित्यान् ॥ इन्द्राग्न्योर्मध्ये अश्विनोर्भैषज्येनेति अश्विनीकुमारौ ॥ अग्नियमयोर्मध्ये ओमासश्चेति विश्वेदेवम् ॥ यमनिर्ऋत्योर्मध्ये—अमित्यन्देवꣳसवितेति सप्तयक्षान् ॥ निर्ऋति-वरुणयोर्मध्ये आयङ्गौरिति सर्पान् ॥ वरुण-वायुमध्ये अप्सरसामित्यप्सरसः ॥ ब्रह्म-सोमयोर्मध्ये यदक्रन्द इति स्कन्दम् ॥ तत्रैव ऋषभमेति

नन्दीश्वरम् ॥ तत्रैव कदूद्रायेति शूलम्॥ तत्रैव कुमारमिति महाकालम् ॥ ब्रह्मेशानयोर्मध्ये अदितिरिति दक्षादिसप्तगणान् ॥ ब्रह्मेन्द्रयोर्मध्ये तामग्निवर्णामिति दुर्गाम् ॥ तत्रैव इदंविष्णुरिति विष्णुम् ॥ ब्रह्माग्नेयोर्मध्ये उदीरतामिति स्वधाम् ॥ ब्रह्म-यमयोर्मध्ये परमृत्योरिति मृत्युरोगौ ॥ ब्रह्म-निर्ऋत्योर्मध्ये गणानान्त्वेति गणपतिम् ॥ ब्रह्म-वरुणयोर्मध्ये शन्नोदेविरिति अपः ॥ ब्रह्म-वाय्योर्मध्ये मरुतोयस्येति मरुतः ॥ ब्राह्मणपादमूले कर्णिकाधः स्योनापृथिवीति पृथ्वीम् ॥ तत्रैव नदीभ्यः इति इष्टम् ॥ तत्रैव धाम्नोराजमिति सप्तसागरान् ॥ तदुपरि मेरुनाम मन्त्रेण पूजयेत्॥ ईशानसमीपे त्रिशूलम्। इन्द्रसमीपे वज्रम्। अग्निसमीपे शक्तिम्। यमसमीपे दण्डम्। निर्ऋतिसमीपे खड्गम्। वरुणसमीपे पाशम्। वायुसमीपे अङ्कुशम् ॥ तद्बाह्ये—उत्तरे गौतमम्। ई० भरद्वाजम्। पू० विश्वामित्रम्। आ० कश्यपम्। द० जमदग्निम्। नै० वसिष्ठम्। प० अत्रिम्। वा० अरुन्धतीम् ॥ तद्बाह्ये पूर्वादिक्रमेण ऐन्द्रीं, कौमारीं, ब्राह्मीं, वाराहीं, चामुण्डां, वैष्णवीं, माहेश्वरीं, वैनायकीं इत्यष्टौशक्तिः पूजयेत् ॥ इत्थं मण्डलदेवताः सम्पूज्य सायङ्काले कर्ता सुप्रक्षालितपाणिपादः सर्वतोभद्रसमीपस्थासने उपविश्याचम्य पूर्वाभिमुखो भूत्वा दीप-कलश-गणेशादीनां तत्तन्मन्त्रेण पुष्पाञ्जलिं समर्प्य पूजामारभेत् ॥

एकादश्युद्यापनम्

सर्वतोभद्रमध्ये कलशविधिना कलशं सम्पूज्य तदुपरि ताम्रस्थालीं निधाय तदुपरि शंख-चक्र-गदा-पद्मयुत लक्ष्मी-सहित नारायणप्रतिमां तत्पूजाविधिना सम्पूज्य ॥ तत्र विशेषविहितानि (लड्डू-गुण-घेवर-जिलेबी-सेल-कसार-सत्तु-बारा-दूध-भात-दही-फीनी-स्वारी-पूवा-पेड़ा-चमचम-तिलौरी-बर्फी-चीनीका रोटी-चीनी-केरा-घिउ-मुगदल-गुड-भात) एतानि समर्प्य रात्रौ जागरणादिकं कुर्यात् । प्रातः पूजापद्धत्युक्तदेवान् प्रत्येकं पायस-तिलाज्यैर्हुत्वा देवं इदं विष्णुरिति मन्त्रेण पुरुषसूक्तेन वाष्टोत्तरशतं हुत्वा देवस्योत्तरपूजां विधाय प्रार्थयेत्

कृष्णाय वासुदेवाय जगतः परमात्मने । शरण्यायाप्रमेयाय गोविन्दाय नमो नमः ॥
नमः स्थूलाय सूक्ष्माय नमो व्यापकरूपिणे । अनन्ताय जगद्धात्रे ब्रह्मणेऽनन्तमूर्त्तये ॥
अव्यक्तायाऽखिलेशाय चिद्रूपाय गुणात्मने । नमो मूर्त्ताय सिद्धाय पराय परमात्मने ॥
देवदेवाय वन्द्याय पराय परमेष्ठिने । कर्त्रे विश्वस्य गोप्त्रे च तत्संहर्त्रे च ते नमः ॥
मयाऽद्यस्मिन् व्रते देव यदपूर्णं कृतं विभो ! सर्वं भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ॥

द्वादशब्राह्मणेभ्यो पक्वान्नसहितद्वादशपूर्णघटान् दत्वा शय्यादानमारभेत् ॥

शय्यादानम्—कर्ता आचम्य ॐ अद्यत्यादि देशकालाद्युल्लेखनान्ते अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम श्रुति-स्मृति-पुराणोक्तफलावाप्तये एतावत्कालपर्यन्तकृतामुकव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गता सिद्धये श्रीपरमेश्वरामुकदेवताप्रीतये अमुकगोत्रामुकनामानौ द्विजदम्पती यथामिलितोपचारैरहं पूजयिष्ये ॥ ततः पादप्रक्षालनम् ॥ अर्घ्यम्—

भूमिदेवाग्रजन्मासि केशवस्य प्रियः सदा । प्रत्यक्षदेवस्त्वं गृह्ण मत्तोऽर्घ्यं द्विजसत्तमम् ॥

आचमनीयम्, यज्ञोपवीतम्, आभूषणम्, तिलकम्, अक्षतान्, पुष्पम्, मालाम्, धूपम्, दीपम्, भाग-द्वयं नैवेद्यम्, फलम्, ताम्बूलम्, द्रव्यम्, नीराजनम्, दक्षिणां च कृत्वा प्रार्थयेत्—

पूजितस्त्वं यथाशक्त्या पूजितः परमेश्वरः । ऐहिकामुष्मिकीं देव ! कार्यसिद्धिं ददस्व मे ॥

नमस्कारः—ततः सोपस्करणशय्यायै नमः इति गन्धादिना शय्यां सम्पूज्य वारिणाऽभिषिच्य कुश-तिल-जला-न्यादाय—अद्येत्यादि अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम श्रीपरमेश्वरामुकदेवताप्रीतये कृतस्याऽमुकव्रतस्योद्यापनकर्मणः प्रतिष्ठासांगतासिद्धिपूर्वक सपत्निकाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—यथा न कृष्णशयनं शून्यं सागरजातया। शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च। शय्या ममाप्यशून्यास्तु तस्माज्जन्मनि जन्मनि॥

दक्षिणाद्रव्यमादाय—ॐ अद्य कृतैतत्सोपस्करणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

गोदानम्, गां सम्पूज्य—अद्येत्यादि अमुकगोत्रोऽमुकशर्मा सपत्नीकोऽहं मम आचरितस्यामुकव्रतोद्यापनकर्मणः प्रतिष्ठासांगतासिद्धिपूर्वकामुकदेवताप्रीतये स्वर्णशृंगीं रौप्यखुरीं ताम्रपृष्ठीं कांस्यदोहनीं प्रवाललांगूलभूषितां सुवर्णतिलकसंयुतां वस्त्रयुगच्छन्नां सवत्सामिमां गां रुद्रदैवताकाममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

प्रार्थना—कपिले सर्वदेवानां पूजनीयासि रोहिणी। तीर्थं देवमयी यस्मात्ततः शान्तिं प्रयच्छ मे॥

दानप्रतिष्ठा—अद्य कृतैतत्सालङ्कारगोदानप्रतिष्ठासांगतासिद्धय इदं रजतं चन्द्रदैवतममुकगोत्राय तुभ्यमहं सम्प्रददे। ततो परिधानीयवस्त्राण्यग्रे कृत्वा सम्पूज्य परिधानीयवस्त्रेभ्यो नमः इति कुश-जलेन सम्प्रोक्ष्य, सङ्कल्पः—अद्येत्यादि ममुकदेवताप्रीतये एतावत्कालपर्यन्तं कृतामुकव्रतस्योद्यापन-

कर्मणः सांगतासिद्धये एतद्वस्त्रतन्तुसम्मितावच्छिन्नवैराजलोकप्राप्तिपूर्वकशतकाद्यवच्छिन्नवैकुण्ठ भवनप्राप्तिकामः श्रीपरमेश्वरप्रीतये इमानि श्वेत-कृष्ण-रक्त-पीत-हरितादिरङ्गपूतानि परिधानीय-वस्त्राणि बृहस्पतिदैवतानि यथानामगोत्रायामुकशर्मणे ब्राह्मणाय० ॥ प्रार्थना, श्वेतस्य—

शरण्यं सर्वलोकानां लज्जाया रक्षणं परम्। सुवेशधारि त्वं यस्मादतः शान्तिं प्रयच्छ मे ॥

रक्तस्य—रक्तवस्त्रं शुभं यस्मादादित्यस्य प्रियं सदा। प्रदानादस्य मे सूर्यः प्रीतः शान्तिं प्रयच्छतु ॥

कृष्णस्य—धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम्। सर्वपापप्रणाशोऽस्तु कृष्णवस्त्रप्रदानतः ॥

दानप्रतिष्ठा—अद्य कृतैतत्परिधानीयवस्त्रदानकर्मणः प्रतिष्ठासांगतासिद्ध्यर्थं यद्द्रव्यं तद्दैवतं यथा-नामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

भूषणदानम्—कुश-जलेन 'आभरणेभ्यो नमः' इति सम्प्रोक्ष्य, सम्पूज्य सङ्कल्पः—अद्येत्यादि मम सार्वदिक-विरहकालानवस्थित्युत्तमरूपसौभाग्ययुतसुस्थितसप्तकुलाधिकसर्वगुणात्मीयविष्णुकुलजन्मकामः श्रीपरमेश्वरप्रीतये इमानि हेम-रौप्य-मुक्तामण्यादिमयाभरणानि विष्णुदैवतानि यथानामगोत्राय०

प्रार्थना सुवर्णस्य—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

रौप्यस्य—शिवनेत्रोद्भवं पुण्यं रजतं पितृवल्लभम्। तस्मादस्य प्रदानेन रुद्रः सम्प्रीयतां मम॥
अंगुलीयकस्य—हिरण्यगर्भसम्भूतं सौवर्णं चांगुलीयकम्। धर्मप्रदं प्रयच्छामि प्रीयतां कमलापतिः॥
वलयस्य—काञ्चनं हस्तवलयं रूपकान्ति सुखप्रदम्। विभूषणं प्रयच्छामि प्रीयतां कमलापतिः॥
कुण्डलस्य—क्षीरोदमथने पूर्वमुद्धृतं कुण्डलद्वयम्। श्रिया सह समुद्भूतं ददे श्रीः प्रीयतामिति॥
मुक्तायाः—ताम्रवर्णसमाभासा रत्नेष्वधिकमुत्तमाः। मुक्ताः समुद्भवाः सन्तु भुक्तिमुक्तिप्रदा मम॥
रत्नेषु मणिषु चैव सर्वदेवा व्यवस्थिताः। तथा शान्तिं प्रयच्छन्तु मणिरत्नं ददाम्यहम्॥

ॐ अद्य कृतैतद्धेम-रौप्य-ताम्र-मुक्तामयाभरणदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्राय० ॥

हेम-रौप्य-पित्तल-कांस्यादि भोजनपाकभाण्डादिदानम्॥ कुशवारिणा 'पाकभोजनपात्रेभ्यो नमः' इति सम्प्रोक्ष्य सम्पूज्य च संस्पृश्य—ॐ अद्येत्यादि सौभाग्या-वैधव्यसर्वगुणोपेतभृत्य-मित्रादिजन्ध्युत-तत्त्वसुखानुत्तमरूपावाप्तिकाम इमानि हेम-रौप्य-ताम्र-पित्तल-कांस्याऽयसादिघटितानि पानादि-पात्राणि विष्णुदैवतानि यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

प्रार्थना—आपाकब्रह्मरूपाःस्थ भाण्डनामानि जन्तवः। तत्प्रदानात् प्रजापुष्टिः सर्वत्रास्तु ममाज्ञया॥

भाण्डरूपाणि यान्यत्र कल्पितानि मया किल। भूत्वा सत्त्वानुरूपाणि उपतिष्ठन्तु तानि वै॥

स्वर्णपात्रस्य—जन्मान्तरसहस्रेषु यत्कृतं दुरितं मया। स्वर्णपात्रप्रदानेन शान्तिरस्तु सदा मम॥

पित्तलस्य—पापानि यान्यनेकानि कामाकाम कृतानि च। पित्तलस्य प्रदानेन तानि नश्यन्तु मे सदा॥

दानप्रतिष्ठा—अद्य कृतैतद्धेम-रौप्य-ताम्र-पित्तलायसकांश्यादिना भोजन-पाकादिपात्रदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

अन्नदानम्—कुशजलेन 'सव्यञ्जनतण्डुलेभ्यो नमः' सम्प्रोक्ष्य, सम्पूज्य, संस्पृश्य—ॐ अद्येत्यादि मम सर्व-कामसमृद्धि श्रीमत्सूर्यसंकाशविमानारोहण-बहुगन्धर्वोपगीयमान-बह्वप्सरोगण सेव्यमानतण्डुल-समसंख्यासहस्रवर्षावच्छिन्नस्वर्गवासार्थं बहुपुरुषाहारपरिमितान् ससूपतण्डुलान् प्रजापतिदैवतान् यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

प्रार्थना—पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि। तस्मात्तण्डुलदानेन प्रीयतां विश्वदेवताः॥

दानप्रतिष्ठा—अद्य कृतैतत्सव्यञ्जनतण्डुलदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे०॥

छत्रदानम्—कुश-जलेन 'छत्राय नमः' सम्प्रोक्ष्य सम्पूज्य—अद्येत्यादि यमपथाधिकरणकतीक्ष्णभयक्षुरधारा-
सिमार्गसन्तरणघोरातपवारणार्थं इदं छत्रं इन्द्रदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय० ॥

प्रार्थना—सर्वेषां चैव दानानां छत्रमातपवारणम्। सुखदं मोक्षदं यस्मात्तस्माच्छान्तिं प्रयच्छ मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् छत्रदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्राय० ॥

उपानद्दानम्—कुश-जलेन 'उपानद्भ्यां नमः' सम्प्रोक्ष्य, सम्पूज्य—अद्य यमपथाधिकरणकदुर्गभूसन्तरणार्थं
तप्तवालुकासिकण्टकाङ्कितसन्तरणोत्पन्नसुखित्वकाम इमे उपानहौ उत्तानाङ्गिरो दैवते यथानाम०

प्रार्थना—उपानहौ प्रदास्यामि कण्टकादिनिवारणे। सर्वस्थानेषु सुखदं ताभ्यां शान्तिं प्रयच्छताम्॥

दानप्रतिष्ठा—अद्य कृतैतद् उपानहदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्राय० ॥

यष्टिदानम्—कुश-जलेन 'यष्ट्यै नमः' सम्प्रोक्ष्य सम्पूज्य च अद्य नेत्रहीनदुर्बलानां सुखेन मार्गगमनार्थं
दुष्टसत्वभयनिवारणार्थं इमां यष्टिं वनस्पतिदैवताकां यथानामगोत्रायामुकशर्मणे० ॥

प्रार्थना—यतिभ्यो वैष्णवं दण्डं द्विजेभ्यो हि खनित्रकम्। प्रदाय परलोकेऽसौ यमदण्डं न गच्छति ॥

दानप्रतिष्ठा—अद्य कृतैतद् यष्टिदानप्रतिष्ठार्थं यद्दद्यं तद्दैवतं यथानामगोत्राय० ॥

व्यजनदानम्—कुश-यव-जलेन 'व्यजनाय नमः' संप्रोक्ष्य, सम्पूज्य—अद्य मम धर्मकाले जनिष्यमाणशरीर-सुखार्थं इदं व्यजनं समीरदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—दुःखापहं सुखप्राप्तिर्दाहशान्तिकरं परम्। तस्मात् व्यजनदानाच्च तापाच्छान्तिं प्रयच्छतु ॥

दानप्रतिष्ठा—अद्य कृतैतद् व्यजनदानप्रतिष्ठार्थं यद्दद्यं तद्दैवतं यथानामगोत्रायामुकशर्मणे० ॥

पूर्णपात्रदानम्—ॐ अद्येत्यादि मया कृतस्यैकादशीव्रतस्य यथोक्तफलावाप्तये श्रीमल्लक्ष्मीनारायणप्रतिमा पूजन-हवन-शय्यादानादिकर्मणः परिपूर्णतासिद्धये इदं तण्डुलपूर्णं सफलं सद्रव्यं प्रजापतिदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रतिमादानम्—अद्येह श्रुति-स्मृति-पुराणोक्तफलावाप्तिपूर्वकं श्रीमल्लक्ष्मीनारायणप्रीतये कृतस्यकादशी-व्रतस्योद्यापनांगत्वेन सुपूजितां सोपस्करसौवर्णामिमां लक्ष्मी-नारायणप्रतिमां लक्ष्मी-नारायण-प्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—हर ! प्रसीद देवेश ! सर्वलोकवरप्रद ! तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-स्वर्णनिर्मितसोपस्करश्रीलक्ष्मी-नारायणप्रतिमादानकर्मणः प्रतिष्ठा-साङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—ॐ अद्येत्यादि मत्कृतस्यैकादशीव्रतस्योद्यापनकर्मणः साङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थं इमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतममुकदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय० ॥

प्रार्थना—नमस्ते कपिले देवि ! संसारार्णवतारिणि ! मया दत्ता द्विजेन्द्राय प्रीयतां च जनार्दनः ॥

दानप्रतिष्ठा—अद्य कृतैतत् गोदानप्रतिष्ठार्थं यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

इत्येकादश्युद्यापनम् ॥

★

हरितालिकोद्यापनविधिः—सर्वोद्यापनविधौ सर्वतोभद्रमण्डलैकदेशे कलशं संस्थाप्य सम्पूज्य च, तदुपरि ताम्रस्थालीं निधाय स्थाल्युपरि रजतनिर्मितां वृषारूढां महादेवप्रतिमां सुवर्णनिर्मितां गौरीप्रतिमां च तत्पूजनविधिना सम्पूज्य रात्रौ जागरणं कुर्यात् । प्रातर्देव्या उत्तरपूजां विधाय प्रार्थना—

नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने । नन्दि-भृङ्गि-महाकालगणयुक्ताय शम्भवे ॥
शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे । शिवायै सर्वमाङ्गल्यै शिवरूपे जगन्मये ॥
संसारभयसन्तापात् त्राहि मां सिंहवाहिनि ! येन कामेन देवेशि पूजितासि महेश्वरि ! ॥
राज्य-सौभाग्य-सम्पत्तिं देहि मामम्ब पार्वति !

षोडशब्राह्मणेभ्यः सौभाग्यद्रव्यवस्त्रसहितषोडशपात्रदानम् ॥ शय्यादानदिने च तान् दत्वा, पूर्णपात्रदानम् ॥

प्रतिमादानम्—अद्येत्यादि अमुकगोत्रोऽहं मम श्रुति-स्मृति-पुराणोक्तफलावाप्तिपूर्वक श्रीउमामहेश्वर-प्रीतये कृतस्य हरितालिका व्रतस्योद्यापनाङ्गत्वेन सुपूजितोपस्करां रौप्यनिर्मितमहेश्वरप्रतिमां सुवर्णनिर्मितगौरिप्रतिमामुमामहेश्वरदेवतामुमामहेश्वरप्रीतये यथानामगोत्राय ब्राह्मणाय० ॥

प्रार्थना—शम्भो ! प्रसीद देवेश ! सर्वलोकवरप्रद ! तव मूर्तिप्रदानेन व्रत सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतदुमामहेश्वरप्रतिमादानकर्मणः साङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगो०

गोदानम्—ॐ अद्येत्यादि मया कृतस्य हरितालिकाव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धय न्यूनातिरिक्तपरिपूर्णार्थं इमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्यं अमुकदैवतं यथानामगोत्राय० ॥

प्रार्थना—कपिलेति ॥ दानप्रतिष्ठा—कृतैतत् सालङ्कारगोदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्द्रव्यं तद्दैवताकं अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । इति हरितालिकोद्यापनम् ॥

*

ऋषिपञ्चम्युद्यापनविधिः—कलशोपरि ताम्रस्थाल्युपरि सौवर्णीः ऋषिप्रतिमाः संस्थाप्य तत् पूजाविधिना पूजां निर्वर्त्य रात्रौ जागरणं कुर्यात् । प्रातः ऋषीणामुत्तरपूजां विधाय तिलसर्पिषा १०८ 'ॐ सप्तऽऋषयः प्रतिहिताः शरीरेसप्तरक्षन्तिसद०' इति मन्त्रेण होमं समाप्य ऋषीन् प्रार्थयेत्—

नमोऽस्तु ऋषिवृन्देभ्यो देवर्षिभ्यो नमो नमः । सर्वपापहरेभ्यो हि वेदविद्भ्यो नमो नमः ॥
एते सप्तर्षयः सर्वे भक्त्या सम्पूजिता मया । सर्वं पापं व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥
न्यूनातिरिक्तकर्माणि मया यानि कृतानि च । क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः ॥

ततः ब्राह्मणेभ्यो वस्त्रालङ्कारदक्षिणादानम्॥ शय्यां चैतेभ्यो दद्यात्॥

प्रतिमादानम्—अद्येत्यादि अमुकदेव्यहं मम रजस्वलावस्थायां ज्ञाताज्ञातकृतसम्पर्कजनितदोषनिवृत्तये सप्तर्षिप्रीत्यर्थं कृतस्य ऋषिपञ्चमीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजिताः सौवर्ण्यः सारुन्धतिकाः सप्तर्षिप्रतिमाः सप्तर्षिप्रीतये अमुकोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं० ॥

प्रार्थना—तपोधना ज्योतिरूपा ऋषयो मे प्रसीदतः। भवतां मूर्तिदानेन व्रतं सम्पूर्णमस्तु मे॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजितसारुन्धतिकसप्तर्षिप्रतिमादानकर्मणः प्रतिष्ठासांगतासिद्धये इदं अमुकद्रव्यममुकदैवतं यथानामगोत्राय यथानामशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

गोदानम्—अद्य कृतैतदृषिपञ्चमीव्रतोद्यापनकर्मणः प्रतिष्ठासांगतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थं इमां गां रुद्रदैवत्यां तन्निष्क्रयं वा यद्देयं तद्दैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

प्रार्थना—कपिलेति॥ दानप्रतिष्ठा—अद्य कृतैतद्गोदानप्रतिष्ठासांगतासिद्धये यथानामगोत्राय० ॥ इति॥

*

कृष्णाष्टम्युद्यापनविधिः—कलशोपरि ताम्रस्थालीं स्थाल्युपरि लक्ष्मीयुक्तचतुर्भुजकौस्तुभादिसंयुक्त सुवर्ण-प्रतिमां संस्थाप्य तत्पूजाविधिना पूजां समाप्य रात्रौ जागरणं कुर्यात् ॥ प्रातर्देवस्योत्तरपूजां विधाय तिलाज्ययुक्तपायसेन मूलमन्त्रेण १०८ पुरुषसूक्तेन च हुत्वा देवं प्रार्थयेत्—

नमस्तुभ्यं जगन्नाथ! देवकीतनय! प्रभो! वासुदेवात्मजानन्त यशोदानन्दवर्द्धन ॥
गोविन्द गोकुलानन्द! गोपीकान्त! नमोऽस्तु ते। त्राहि मां सर्वपापघ्न दुःखशोकार्णवात् प्रभो ॥
सवलोकेश्वर! त्राहि पतितं मां भवार्णवात् ॥

अष्टब्राह्मणेभ्योऽन्नपूर्णकलशाष्टकदानम्। सति विभवे शय्यां दत्वा पूर्णपात्रं दद्यात् ॥

प्रतिमादानम्—अद्येत्यादि अमुकशर्माऽहं मम सकुटुम्बस्य कृष्णाष्टमीव्रतस्य यथोक्तफलावाप्तये उद्या-पनाङ्गत्वेन सुपूजितां सौवर्णसोपस्करां श्रीकृष्णप्रतिमां श्रीकृष्णप्रीतये० ॥

प्रार्थना—अवतारसहस्राणि करोषि मधुसूदन! अस्य प्रदानात् देवेश! व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-स्वर्णनिर्मित-सोपस्कर-श्रीकृष्णप्रतिमादानकर्मणः प्रतिष्ठासांगता सिद्धये यद्देयं तद्दैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—अद्येत्यादि अमुकशर्माहं मम कृतस्य कृष्णाष्टमीव्रतस्योद्यापनकर्मणः सांगतासिद्धये न्यूनातिरिक्तपूर्णार्थं इमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्यं अमुकदैवतं यथानामगोत्राय० ॥

प्रार्थना—कपिलेति । दानप्रतिष्ठा—अद्य कृतैतत् गोदानकर्मणः प्रतिष्ठासांगतासिद्धये इदं द्रव्यम० । इति ।

*

अनन्तचतुर्दश्युद्यापनविधिः—कलशोपरि ताम्रस्थाल्युपरि ग्रन्थिवत्सुवर्णानन्तदोरकं सलक्ष्मीकं चतुर्भुजं वासुदेवप्रतिमां तत्पूजाविधिना संपूज्य रात्रौ जागरणं प्रातर्देवस्योत्तरपूजां विधाय ॥ दधिमध्वाज्यदुग्धाक्ततिलैर्वा पायसेनाश्वत्थशमीपल्लवैश्च अतोदेवेति मन्त्रेण प्रत्येकं १०८ होमं कृत्वा प्रार्थयेत्—

अनन्तकामान् मे देहि सर्वकामफलप्रद । अनन्ताय नमस्तुभ्यं पुत्रपौत्रायुवर्द्धन ॥
अनन्तः सर्वकामानामधिपः सर्वकामदः । व्रतेनानेन सुप्रीतो भव त्वं हि सदा मम ॥

चतुर्दशब्राह्मणेभ्यः पक्वान्नपूरितवस्त्रोपवीतसहित चतुर्दशकुंभदानम् । सति सम्भवे शय्यां दत्वा पूर्णपात्रदानम् ।

प्रतिमादानम्—अद्येत्यादि अमुकशर्माहं मम क्षेमस्थैर्यायुरारोग्य-चतुर्विधपुरुषार्थसिद्धिपूर्वकानन्तप्रीतये कृतस्यानन्तचतुर्दशीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सौवर्णीं सोप-

स्करां अनन्तप्रतिमां अनन्तदेवताकां यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—अनन्त देवदेवेश ! सर्वलोकवरप्रद। तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजितस्वर्णनिर्मितानन्तप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—अद्येत्यादि अमुकगोत्रोऽमुकशर्माहं मम कृतस्यानन्तचतुर्दशीव्रतस्योद्यापनकर्मणः सांगतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं द्रव्यं अमुकदैवतं० ॥

प्रार्थना—कपिलेति ॥ दानप्रतिष्ठा—अद्यकृतैतदित्यादि ॥ इति अनन्तचतुर्दश्युद्यापनम् ॥

*

सामान्याष्टमी-महाष्टमी-चैत्राष्टमी-व्रतप्रतिष्ठा—कलशोपरि सुवर्णप्रतिमां तत्पूजाविधिना सम्पूज्य रात्रौ जागरणं प्रातर्देव्या उत्तरपूजां विधाय । ॐ अम्बेऽअम्बिकेति १०८ होमं समाप्य प्रार्थयेत्—

महिषघ्नि ! महामाये ! चामुण्डे मुण्डमालिनि ! द्रव्यमारोग्यविजयं देहि देवि ! नमोऽस्तु ते ।
भूत-प्रेत-पिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ! देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥

सर्वमङ्गलमाङ्गल्ये शिवे ! सर्वार्थसाधिके । उमे ब्रह्माणि कौमारि विश्वरूपे ! प्रसीद मे ॥

नवब्राह्मणेभ्यो यथाशक्ति रक्तवस्त्र-दक्षिणादिदानं कुर्यात् । कुमारीपूजनम्—सुलिप्तभूमौ स्थापितासनेषु प्राङ्मुखीः कुमारीः संस्थाप्य सङ्कल्पः—अद्येत्यादि मम कृतस्यामुकाष्टमीव्रतस्योद्यापनकर्मणः प्रतिष्ठासांगतासिद्धये देवीप्रीत्यर्थं एतावत्संख्याककुमारीणां आसादितसामग्रिणा भोजनपूर्वकपूजनं चाहं करिष्ये ।

तासां पादप्रक्षालनम्—जगत्पूज्ये जगद्वन्दे सर्वशत्रुविनाशिनि ! पूजां गृहाण कौमारी जगन्मातर्नमोऽस्तु ते ।

पाद्यादिनैवेद्यान्तं समर्च्य विभवानुसारेण सौभाग्यद्रव्य-वस्त्र-भूषणादीनि दद्यात् । खण्डमोदक-घृत-दुग्ध-मधूनि यथासुखं शनैः शनैर्भोजयेत् ॥ तासां दत्ताचमनीयानां करेणाक्षतपुष्पादिकं दत्त्वा प्रतिगृह्य विसर्जयेत् ॥

प्रतिमादानम्—अद्येत्यादि अमुकशर्मा देवीप्रसादविधिनाभीष्टावाप्तिराज्यादिसुखभोगोत्तरं देवीलोकगमनकामनया कृतस्यामुकाष्टमीव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां स्वर्णनिर्मितां सोपस्करां देवीप्रतिमां श्रीदेवीप्रीतये यथानामगोत्राय ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—दुर्गे ! शिवे ! भये ! माये ! नारायणि ! सनातने ! चामुण्डे ! मङ्गलं देहि तव रूप प्रदानतः ॥

दानप्रतिष्ठा—अद्य कृतैतत् प्रतिमादानप्रतिष्ठासांगतासिद्धये यद्दुदेयं तद्दुदैवतं यथानामगोत्राय० ॥

गोदानम्—अद्येत्यादि ममैतत्कालपर्यन्तकृतामुकाष्टमीव्रतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां गां रुद्रदैवतां तन्निष्क्रयीभूतं यद्द्रव्यं तद्दैवतं अमुकगोत्राय० ॥

प्रार्थना—कपिलेति० ॥ दानप्रतिष्ठा—अद्यकृतैतदित्यादि ॥ इत्यष्टमीव्रतोद्यापनम् ॥

*

श्रीरामनवमीव्रतोद्यापनविधिः—कलशोपरि ताम्रस्थालीं निधाय स्थाल्युपरि सुवर्णनिर्मितां जानकीसहित-श्रीरामप्रतिमां तत्पूजाविधिना सम्पूज्य रात्रौ जागरणं कुर्यात् ॥ प्रातर्देवस्योत्तरपूजां विधाय पायससमिच्चरुतिलैः पुरुषसूक्तेन मूलमन्त्रेण वा १०८ होमं समाप्य श्रीरामं प्रार्थयेत्—

नतोऽस्मि देवदेवेश! श्रीराम! त्वत्पदाम्बुजम्। यच्चिन्त्यते कर्मपाशाद् हृदि नित्यं मुमुक्षुभिः॥
मायया गुणमय्या त्वं सृजस्यसि विलुम्पसि। अतस्त्वत्पादकमले भक्तिरेव सदाऽस्तु मे॥
संसारभयतप्तानां भैषज्यं भक्तिरेव ते॥

बटु-ब्रह्मचारिभ्यः फल-वस्त्र-वराटकसहितनववंशदण्डदानम् ॥ षोडशब्राह्मणेभ्यः सहिरण्यघृततिलताम्रपात्रदानम्। कन्या-कुमारपूजा—अद्येत्यादि अमुकगोत्रोऽहं मम श्रीरामप्रीतये कृतस्य रामनवमीव्रतस्योद्याप-

नाङ्गत्वेन सुपूजितां सोपस्करां सौवर्णीं रामप्रतिमां श्रीरामप्रीतये अमुकगोत्रायामुकशर्मणे० ॥

प्रार्थना—इमां स्वर्णमयीं रामप्रतिमां समलंकृताम् । चित्रवस्त्रयुगच्छन्नां रामाय राघवाय वै ॥
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-स्वर्णनिर्मित-सोपस्कर-रामप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्दुदेयं तद्दुदैवतं यथानामगोत्राय० ॥

गोदानम्—अद्येत्यादि मम कृतस्य रामनवमीव्रतस्योद्यापनकर्मणः प्रतिष्ठासांगतासिद्धये न्यूनातिरिक्त-परिपूर्णार्थमिमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतं यद्द्रव्यं तद्दुदैवतं अमुकगोत्राय० ॥

प्रार्थना—कपिलेति ॥ दानप्रतिष्ठा—अद्य कृतैतदित्यादि ॥ इति रामनवमी व्रतप्रतिष्ठा ॥

*

शनिप्रदोष-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि सुवर्णनिर्मितसगौरीरुद्रप्रतिमां तत्पूजाविधिना सम्पूज्य रात्रौ जागरणं कुर्यात् । प्रातर्देवस्योत्तरपूजां विधाय गौरीमिमां, त्र्यम्बकमिति मन्त्राभ्यां प्रत्येकं १०८ हुत्वा देवं प्रार्थयेत्—

जय देव! जगन्नाथ! जय शंकर शाश्वत! जय सर्वसुराध्यक्ष! जय सर्वसुरार्चित!॥
जय सर्वगुणातीत! जय सर्ववरप्रद! प्रसीद मे महादेव! संसारादद्यखेदतः॥
सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर!॥

चतुर्दशब्राह्मणेभ्यो यज्ञोपवीत-वस्त्र-जलपूर्णघटदानम्। पूर्णपात्रदानं, प्रतिमादानम्—

अद्येत्यादि मम श्रुति-स्मृति-पुराणोक्तफलावाप्तिपूर्वकत्र्यम्बकप्रीतये एतावत्कालकृतस्य शनिप्रदोषव्रतस्योद्यापनाङ्गत्वेन सुपूजितां स्वर्णनिर्मितां सोपस्करां शिवप्रतिमां शिवप्रीतये अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

प्रार्थना—शम्भो! प्रसीद देवेश! सर्वलोकेश्वर! प्रभो! तव रूपप्रदानेन प्रसन्नास्तु मनोरथाः॥

दानप्रतिष्ठा—अद्य कृतैतत् सोपस्कर-सुपूजित-शिवप्रतिमादानकर्मणः प्रतिष्ठासांगतासिद्धये यद्दद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे॥

गोदानम्—अद्यत्यादि ममैतावत्कालकृतस्य शनिप्रदोषव्रतस्योद्यापनकर्मणः प्रतिष्ठासांगतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थं श्रीसदाशिवप्रीतये इमां गां रुद्रदैवत्यां तन्निष्क्रयं यद्द्रव्यं तद्दैवतं

अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥
प्रार्थना—कपिलेति ॥ दानप्रतिष्ठा—अद्य कृतैतदित्यादि ॥ इति शनिप्रदोषव्रतम् ॥

*

पक्षप्रदोष-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि त्रिनेत्रं जटाऽर्द्धचन्द्राऽनेकालङ्कारनागहारं दक्षिणाधः करतले वरं ऊर्ध्वे परशुं वामार्द्धे मृगं अधरेऽभयं दधानं व्याघ्रचर्मपरीधानं स्वर्णसिंहासनस्थितं रौप्यं महादेवप्रतिमां तद्वामाङ्कस्थितां दक्षिणाधः करतले पाशम् उर्ध्वे वरमधोऽङ्कुशं दधतीं इषद्धास्ययुक्त-मुखारविन्दां रक्तवर्णां अनेकालङ्कारां रत्नसिंहासनस्थां पार्वती-सुवर्णप्रतिमां तद्विधिना सम्पूज्य रात्रौ जागरणं कुर्यात् । प्रातर्देवस्योत्तरपूजां विधाय 'ॐ नमः शम्भवाय०', 'ॐ अम्बेऽअम्बिके'ति मन्त्राभ्यां प्रत्येकं पायसतिलैः १०००होमः, तिल-वृष-गोदानम्, प्रार्थना, प्रतिमादानादिकं शनिप्रदोषोक्तं ज्ञेयम्। इति पक्षप्रदोषप्रतिष्ठा।

*

शिवरात्रि-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि वृषभस्थितामुमामहेश्वरमूर्तिं तद्विधिना सम्पूज्य रात्रौ जागरणम् । प्रातर्देवस्योत्तरपूजां विधाय पायसतिलैर्नमः शम्भवाय०, गौरी शिवायेति मन्त्राभ्यां १०८

होमः । बिल्वपत्र-तिल-व्रीह्यादिभिरजैकपदादि १४ नाममन्त्रैर्होमः । प्रार्थनामन्त्रः शनि-प्रदोषे द्रष्टव्यः । सर्वत्र यज्ञोपवीत-जलपूर्णं १४ घटदानम् ॥ प्रतिमादानादिकं शनिप्रदोषोक्तमेव द्रष्टव्यम् । तत्र शनि-प्रदोष पदस्थाने शिवरात्रिव्रतस्य इति विशेषः ॥ इति शिवरात्रि-व्रतप्रतिष्ठा ।

*

पौषार्क-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि स्वर्णनिर्मितरविप्रतिमां संस्थाप्य तद्विधिना सम्पूज्य रात्रौ जागरणम् ॥ प्रातर्देवस्योत्तरपूजां विधाय प्रार्थयेत्—

सूर्याय वै पापविनाशनाय विश्वात्मने सप्ततुरङ्गमाय । सामर्ग्यजुर्वामनिधं विधातर्भवाब्धिपोताय नमः सवित्रे॥

भानो ! भास्कर ! मार्तण्ड ! चण्डरश्मे ! दिवाकर ! आरोग्यमायुर्विजयं विद्यां देहि नमोऽस्तु ते ॥

धान्य-गोधूम-गुड-लवणादिदानम् ॥ पूर्णपात्रं, प्रतिमादानम्—ॐ अद्येत्यादि अमुकशर्मा मम एतावत्काल-कृतस्य पौषार्कव्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सोपस्करां सूर्यप्रतिमां सूर्य-प्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—भानो ! प्रसीद देवेश ! सर्वलोकनमस्कृत । तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-सोपस्कर-सुवर्णनिर्मित-भास्करप्रतिमादानकर्मणः प्रतिष्ठासाङ्गता-सिद्धये यद्देयं तद्देवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—अद्य मम एतावत्कालकृतस्य पौषार्कव्रतस्य यथोक्तफलावाप्तये उद्यापनकर्मणः प्रतिष्ठासांगता सिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां गां रुद्रदैवत्यामित्यादि ॥

प्रार्थना—कपिलेति ॥ दानप्रतिष्ठा—कृतैतदित्यादि ॥ इति पौषार्क-व्रतप्रतिष्ठा ।

सोमवती-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि स्वर्णनिर्मितलक्ष्मीनारायणप्रतिमां संस्थाप्य तत्पूजा-विधिना सम्पूज्य रात्रौ जागरणम् ॥ प्रातर्देवस्योत्तरपूजां विधाय इदं विष्णुरिति मन्त्रेण अश्वत्थसमिद्भिः पायसतिलैश्च १०८ हुत्वा प्रार्थयेत्—

नारायणाय देवाय हरये परमात्मने । शरण्यायाप्रमेयाय गोविन्दाय नमो नमः ॥
देवदेवाय वन्द्याय पराय परमेष्ठिने । कर्त्रे विश्वस्य गोप्त्रे च तत्संहर्त्रे च ते नमः ॥

द्वादशब्राह्मणेभ्यो यज्ञोपवीत-वस्त्र-पायसभोजनदानम् ॥ ततः पूर्णपात्र-प्रतिमादानम्—अद्येत्यादि अमुक-देव्यऽहं मम सकलपापक्षयपूर्वक-पुत्रपौत्राद्यभिवृद्धये सुपूजितां-सोपस्करां-स्वर्णनिर्मितलक्ष्मी-

नारायणप्रतिमां श्रीलक्ष्मी-नारायणप्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं० ॥

प्रार्थना—हरे! प्रसीद देवेश! सर्वलोकवरप्रद। तव मूर्तिप्रदानेन मम सन्तु मनोरथाः ॥

दानप्रतिष्ठा—अद्य कृतैतत् सोपस्कर-सुपूजित-स्वर्णनिर्मित-श्रीलक्ष्मीनारायण-प्रतिमादानप्रतिष्ठा साङ्गतासिद्धये यद्दुदेयं तद्दुदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—अद्येत्यादि अमुकदेव्यऽहं मया कृतस्य सोमवतीव्रतस्य यथोक्तफलावाप्तये उद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थमिमां गां रुद्रदैवत्यां तन्निष्क्रयद्रव्यं तद्दुदैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—कपिलेति। दानप्रतिष्ठा—अद्य कृतैतदित्यादि ॥ इति सोमवती-व्रतप्रतिष्ठा।

★

पौर्णमासी-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि रौप्यनिर्मित-चन्द्रप्रतिमां तत्पूजाविधिना सम्पूज्य रात्रौ जागरणम्। प्रातश्चन्द्रस्योत्तरपूजां विधाय इमन्देवेति मन्त्रेण १०८ होमः ॥

प्रार्थना—नमस्तेऽस्तु निशानाथ! रोहिण्याः प्रियवल्लभ! नमस्ते हरभूषाय कलाषोडशधारिणे ॥

रोग-मृत्यु-महोत्पातं ग्रहदोषसमुद्भवम् । तत् सर्वं कुरु नः शान्तिं ताराधिप ! नमोऽस्तु ते ॥

षोडशब्राह्मणेभ्यः क्षीरपूर्णषोडशरौप्यपात्रदानम् ॥ कांस्यपात्रदानम् ॥ सवत्सं १६ उदककुम्भदानम् ॥ पूर्णपात्रदानम् ॥ प्रतिमादानम्—अद्येत्यादि मम श्रुति-स्मृति-पुराणोक्तफलावाप्तिपूर्वक चन्द्रप्रीतये कृतस्य पौर्णमासीव्रतस्योद्यापनाङ्गत्वेन सुपूजितां सोपस्करां रौप्यनिर्मितां चन्द्रप्रतिमां चन्द्रप्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—चन्द्र ! प्रसीद देवेश ! सर्वलोकवरप्रद । तव बिम्बप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-रौप्यनिर्मित-सोपस्कर चन्द्रबिम्बदानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—अद्येत्यादि मम एतावत्कालपर्यन्तकृतस्य पौर्णमासीव्रतस्य यथोक्तफलावाप्तये कृतैतदुद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये न्यूनातिरिक्तपरिपूर्णार्थेमां गां रुद्रदैवत्यां तन्निष्क्रयीभूतममुकद्रव्यं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—कपिलेति । दानप्रतिष्ठा—अद्य कृतैतदित्यादि ॥ इति पौर्णमासी-व्रतप्रतिष्ठा ।

कार्तिक-व्रतप्रतिष्ठा—कलशोपरि ताम्रस्थालीं स्थाल्युपरि स्वर्णनिर्मित राधा-दामोदरप्रतिमां तत् पूजाविधिना सम्पूज्य रात्रौ जागरणम् ॥ प्रातस्तथोत्तरपूजां विधाय नाममन्त्रेण पायस-तिलैः १०८ होमः।

प्रार्थना—दामोदर नमस्तेऽस्तु राधयासहित प्रभो ! व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया ॥
तत्सर्वं नाशमायातु स्थिरा मे चास्तु सन्ततिः। मनोरथाश्च सफलाः सन्तु नित्यं त्वदर्चया ॥
देहान्ते वैष्णवं स्थानं प्राप्नुयामतिदुर्लभम्। मातस्तुलसि कल्याणि! देवि ! दामोदरप्रिये ॥
प्रसीद मम देवेशि! कृपया परया सदा। अभीष्टफलसिद्धिर्मे त्वं कुरु माधवप्रिये ॥
व्रतं सम्पूर्णतां यातु त्वत्प्रसादात् सुरेश्वरि ॥

पूर्णपात्रं, प्रतिमादानम्—अद्येत्यादि मम श्रुति-स्मृति-पुराणोक्तफलावाप्तये कृतस्य कार्तिक-व्रतस्य यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन सुपूजितां सोपस्करां स्वर्णनिर्मितप्रतिमां राधा-दामोदर-प्रीतये यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—हरे प्रसीद देवेश ! सर्वलोकवरप्रद। तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-स्वर्णनिर्मित-राधादामोदरप्रतिमादानकर्मणः प्रतिष्ठासाङ्गतासिद्धये यद्देयं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

गोदानम्—अद्येत्यादि अमुकशर्माऽहं मम कार्तिकव्रत-दीपदान-तुलसीपूजनादेर्यथोक्तफलावाप्तये कृतस्योद्यापनकर्मणः प्रतिष्ठासाङ्गतासिद्धये इमां गां रुद्रदैवत्यां तन्निष्क्रयं द्रव्यं तद्दैवतं यथानामगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ॥

प्रार्थना—कपिलेति । दानप्रतिष्ठा—अद्यकृतैतदित्यादि ॥ स्वर्णनिर्मित तुलसीवृक्षदानम्—अद्येत्यादि मम एतावत् कालपर्यन्तं कृतस्य तुलसीव्रतस्योद्यापनकर्मणः प्रतिष्ठासांगतासिद्धये इमां सुपूजितां सोपस्करां सुवर्णनिर्मितवृक्षरूपां तुलसीदेवीप्रीतये अमुकगोत्रायेत्यादि ॥

प्रार्थना—नमस्तुलसि कल्याणि ! गोविन्दप्रियवल्लभे ! तव मूर्तिप्रदानेन व्रतं सम्पूर्णमस्तु मे ॥

दानप्रतिष्ठा—अद्य कृतैतत् सुपूजित-स्वर्णनिर्मित-तुलसीवृक्षदानकर्मणः प्रतिष्ठासांगतासिद्धये यद्देयं तद्दैवतमित्यादि ॥ रौप्यादिनिर्मितं दीपपात्राणां यथाशक्तिदानम् ॥ इति कार्तिकव्रतोद्यापनम् ।

*

सामान्य-चतुर्दशी-व्रतप्रतिष्ठा—सुवर्णप्रतिमापूजनम् ॥ त्र्यम्बकमिति मन्त्रेण बिल्वपत्रैर्होमः १०८, प्रतिमा दानम्, यज्ञोपवीत-वस्त्र-जलपूर्णघटदानम् ॥ इति सामान्यचतुर्दशी-व्रतप्रतिष्ठा ।

*

सामान्य-सोमवार-व्रतप्रतिष्ठा—वृषारूढमाहेश्वरमूर्तिपूजनम् । पलाशसमिद्भिः त्र्यम्बकमिति मन्त्रेण होमः । तण्डुलपूर्णवंशपात्रयुक्तत्रयोदशघटदानम् । प्रतिमादानम् । गोदानम् ॥ इति सामान्यसोमवार-व्रतप्रतिष्ठा ।

*

मङ्गलचतुर्थी-व्रतप्रतिष्ठा—सुवर्णनिर्मितगणेशप्रतिमापूजनम् । एकविंशतिब्राह्मणानां वस्त्रादिभिः पूजनम् । लड्डूक दानम् । गणानान्त्वेति होमः १०८, प्रतिमादानम्, गोदानम्, पूर्णपात्रदानम् ॥ इति मङ्गलचतुर्थी-व्रतप्रतिष्ठा ।

*

कोजाग्रत-व्रतप्रतिष्ठा—सुवर्णनिर्मित-लक्ष्मीप्रतिमा ऐरावतारूढ-सुवर्णेन्द्रप्रतिमापूजनम् ॐ इदं विष्णुरिति, त्रातारमिन्द्रमिति, श्रीश्चतेति मन्त्रेण १०८होमः । प्रतिमादानम्, गोदानम्, पूर्णपात्रदानम् ॥ इति कोजाग्रत-प्रतिष्ठा ।

स्वस्थानी-व्रतप्रतिष्ठा—सुवर्णप्रतिमापूजनम् ॐ देवीर्द्वारो रेण० होमः १०८, शष्कुली-ताम्बूल-पूगीफल-नाना पुष्पाणां दानम् । प्रतिमा दानम्, गोदानम् ॥ इति स्वस्थानी-व्रतप्रतिष्ठा ।

व्रतप्रतिष्ठादि-विधिः

सर्वप्रतिमादानादिकं निर्वर्त्य अग्निसमीपं गत्वा मेधाकरणम्। पूर्णपात्रदानम्। प्रणीताविमोकादिकर्मशेषं समाप्य यज्ञान्तगोदानं कुर्यात्—अद्येत्यादि तिथ्याद्युल्लेखान्ते मया एतावत्कालपर्यन्तानामेकादश्यादिव्रतानां यथोक्तफलावाप्तये उद्यापनाङ्गत्वेन तत्तद्देवतानामावाहनस्थापनपूजनपूर्वकतत्तद्देवतानां तत्तद्वस्तुभिर्हवनकर्मणः तत्तद्देवताप्रतिमादानकर्मणः द्विजदम्पतिपूजन - शय्यादानादिकर्मणश्च यथोक्तफलावाप्तये न्यूनातिरिक्तपरिपूर्णार्थमिमां गां रुद्रदैवत्यां यथानामगोत्रायेत्यादि ॥

प्रार्थना—कपिलेति ॥ दक्षिणादानम् ॥ दक्षिणाद्रव्यं सम्पूज्यादाय—तिथ्याद्युल्लेखनान्ते अमुकगोत्रोऽमुकप्रवरोऽमुकशर्मा सपत्नीकोऽहं मया एतावत्कालपर्यन्तानामेकादश्यादिव्रतानां यथासादितसामग्रिणा तत्तद्देवतानां आवाहन-पूजन-हवनादिकर्मणस्तथा तद्वतद्देवप्रीतये तत्तद्वस्तूनां दानकर्मणः शय्यादिदानकर्मणः करिष्यमाणब्राह्मणभोजनस्य च यथोक्तफलावाप्तये न्यूनातिरिक्तपरिपूर्णार्थं श्रुति-स्मृति-पुराणोक्तफलावाप्त्यर्थमिमां दक्षिणां रजतखण्डं चन्द्रदैवतं ताम्रं श्रीसूर्यदैवतं

नानानामगोत्रेभ्यो नानानामशर्मभ्यो ब्राह्मणेभ्यो ब्राह्मणीभ्यः कन्याकुमारेभ्यो दीनानाथेभ्यश्च यथाभागं विभज्य यथाकालेन दातुमहमुत्सृजे तत्सन्न मम ॥

ततः आचार्यादया ब्राह्मणा देवादीनामुत्तराङ्गपूजां निर्वर्त्य यान्तु देवेति विसर्ज्य ॥ देवस्यत्वेत्यादि मन्त्रैर्यजमानस्याभिषेकं कुर्युः ॥ ततो यजमानो ब्राह्मणान् भोजयित्वा स्वयमपि सुहृद्युतो भुञ्जीत। इति व्रतप्रतिष्ठाविधिः ॥

महादीपादिदीपपूजाविधिः

सङ्कल्पः—ॐ तत्सदिति अमुकप्रवराया अमुकगोत्राया अमुकनाम्नी देव्या सपरिवाराया मम कायिक-वाचिक-मानसिक-सकलपापक्षयपूर्वक-पूर्वजन्मन्येतज्जन्मनि वा रजोवस्थायां ज्ञानतोऽज्ञानतो वा भ्रमात्कामात् लोभाद्वा बाल्ये यौवने वार्धके स्वस्य पतिबन्धुपरिवारान् वञ्चयित्वा भाण्डाद्युपस्करस्पर्शनदैवपितृकर्मणि पाकक्रियालोपकृते तच्छरीरोत्पन्न-बालवैधव्य-मृतापत्या-पुत्रत्वादिसकलकिल्विषनिरसनार्थं अमुकदेवताप्रीतये घृताक्तान् तिलतैलाक्तान् वा सपादलक्ष-संख्याकदीपप्रज्वलनार्थं लक्षसंख्याकतिल-यव-नखोद्धृताक्षत - सहित - यथामिलितोपचारेण अमुकदेवतापूजनमहं करिष्ये ॥

महादीपवाक्यम्, तिलतैलाक्तमहादीपे सुवर्णप्रतिमां निधाय, प्रज्वाल्य—ॐ तत्सदिति पूर्वसङ्कल्पोच्चारण-पूर्वकामुकप्रवरस्यामुकगोत्रस्य सपरिवारस्यामुकशर्मणो मम कायिक-वाचिक-मानसिक-सकल किल्विषनिरसनपूर्वक-श्रुति-स्मृति-निगम-पुराणागमोक्तफलावाप्तये अद्य सूर्यास्तमारभ्य पुनः सूर्योदयपर्यन्तं तिलतैलाक्तं लोकाख्यमहादीपसंज्ञकं ज्वलितं दीपं अग्निदेवताकं अमुकदेवता-प्रीतये समुत्सृजे ॥

जीवदीपदानसङ्कल्पः—अमुकगोत्राया अमुकप्रवराया अमुकनाम्नीदेव्या मम कायिक-वाचिक-मानसिक सकलकिल्विषनिरसनपूर्वक श्रुति-स्मृति-निगम-पुराणोक्तफलावाप्तये यथामिलितोपचारैः अमुक देवतापूजनपूर्वक-त्रितन्तुनिर्मितान् षडुत्तरत्रिंशत्संख्याकान् तिलतैलाक्तान् सूर्यास्तादारभ्य पुनः सूर्योदयपर्यन्तं प्रज्वलित जीवदीपं अमुकदेवताप्रीतये समुत्सृजे ॥

प्रार्थना। दानप्रतिष्ठा। ततो महादीपादिदीपप्रज्वालनं कृत्वा अन्ते दक्षिणां दत्वा इष्टदेवतां प्रार्थ्य विसर्जयेत् ॥

*

लक्षवर्तिकादीपदानविधिः

कर्ता नित्यक्रियः शुचिराचान्तः सङ्कल्पः-हरिः ॐ तत्सदिति अमुकगोत्रप्रवरायाः सपरिवारामुकनाम्नीदेव्या मम कायिक-वाचिक-मानसिकसकलकिल्विष निरसनपूर्वक विष्णुप्रीत्यर्थं प्रातःकालपर्यन्ताचरितव्रतस्योद्यापनाङ्गतया श्रीविष्णुपूजनानन्तरं हवनकरणार्थं तथा अमुकदेवताप्रीतये लक्षसंख्याकतिल-यव-तण्डुलाक्षतैः पूजनकृतस्य पूजनपूर्वक लक्षवर्तिप्रज्वालनस्य तथा लोकाख्यमहादीपप्रज्वालनकर्मणश्च उद्यापनाङ्गभूत श्रीसहितविष्णोः उमासहितशिवस्य सावित्रीसहितब्रह्मणस्य पूजानन्तरं हवनकरणार्थमेभिश्चन्दन-पुष्पक्षतैर्युष्मानहं वृणे इति ब्राह्मणान् वृत्वा स्वयं च प्रायश्चित्तं कुर्यात् ॥ गोब्राह्मणं सम्पूज्य पूर्वसङ्कल्पं कृत्वा नामगोत्रोच्चारणपूर्वकं मम सकलकिल्विषनिरसनार्थं श्रीनारायणप्रीतये सपादलक्षदीपप्रज्वालनाधिकारसिद्धये गोप्रत्याम्नायीभूतं द्रव्यं यथानामदैवताकं यथानामगोत्रायेत्यादि ॥

संकल्पः—अद्येत्यादि मम समस्तजन्म-बाल्य-यौवन-वार्द्धक्यावस्थोपार्जित-कायिक-वाचिक-मानसिक-सांसर्गिक-सकलपापक्षयपूर्वकैहिकानेकविध-निरवधिकभोगानुभवानन्तरं श्रीपरमेश्वरप्रीतिद्वारा

विष्णुसायुज्यपदप्राप्तिकामो लक्षवर्तिकाप्रज्वालनाङ्गभूत दीप-कलश-गणेशपूजनपूर्वकं ब्रह्म-विष्णु-महेश्वरपूजनं प्रधानदेवतापूजनं चाहं करिष्ये ॥

दीप-कलश-गणेशपूजनं कुर्यात् । अन्यकलशमध्ये इदंविष्णुरिति मन्त्रेण हैमं श्रियासहितं विष्णुं पूजयेत् । तद्दक्षिणे ब्रह्मयज्ञानमिति सावित्रीसहितं ब्रह्माणं पूजयेत् । तदुत्तरे नमः शम्भवायेति मंत्रेण उमासहितं शिवं पूजयेत् । प्रधानदेवतां गङ्गां च षोडशोपचारैः सम्पूज्य ॥ ततः मनोजूतिरिति मन्त्रेण प्राणं प्रतिष्ठाप्य ॐ सहस्रशीर्षेति आसनम् । ॐ पुरुषऽएवेत्युपवेशनम् । ॐ एतावानस्येति पाद्यम् । ॐ त्रिपादूर्ध्वेति अर्घ्यम् । ॐ ततोविराडिति आचमनीयम् । ॐ तस्माद्यज्ञादिति स्नानम् । ॐ तस्माद्यज्ञादिति आच्छादनम् । ॐ तस्मादश्वेति यज्ञोपवीतम् । ॐ तंयज्ञमिति गन्धम् । ॐ यत्पुरुषेति पुष्पम् । ॐ बृहस्पते इति वस्त्रम् । ॐ यवोसीति यवान् । ॐ ब्राह्मणोस्येति धूपम् । ॐ चन्द्रमामनसो इति दीपम् । ॐ नाभ्याऽआसीदिति नैवेद्यम् । ॐ यत्पुरुष इति अञ्जलिकरणम् । ॐ सप्तास्यासन्निति प्रदक्षिणा ॥ तत्पश्चात् गरुडं हंसं वृषभं च सम्पूज्य ॥

अङ्गपूजा–ॐ कालाय नमः शिरः पूजयामि । ॐ विष्णवे० ललाटं० । ॐ वह्नये० नेत्रं० । ॐ रवये०

कर्णौ० । ॐ दीप्ताय० नासिकां० । ॐ निशाकराय० मुखं० । ॐ रुद्राय० कण्ठं० । ॐ शेषाय० स्कन्धं० । ॐ जगद्व्यापिने० बाहू० । ॐ तेजोरूपाय० स्तनौ० । ॐ महेश्वराय० नाभिं० । ॐ विश्वरूपाय० कटिं० । ॐ जगतः प्रभवे० गुदं० । ॐ स्वप्रकाशाय० उरू० । ॐ स्वयंज्योतिषे० जानुनी० । ॐ चतुर्व्यूहाय० गुल्फौ० । ॐ जनाधिपाय० पादौ० । ॐ परब्रह्मणे० सर्वाङ्गं० ॥ ॐ धात्रे नमः पादौ पूजयामि । ॐ विधात्रे० जङ्घे० । ॐ स्रष्टे० उरू० । ॐ प्रजापतये० मेढ्रं० । ॐ परमेष्ठिने० कटीं० । ॐ अग्निरूपाय० नाभिं० । ॐ पद्मनाभाय० हृदयं० ॐ वेधसे० बाहू० । ॐ दामोदराय० कण्ठं० । ॐ हिरण्यगर्भाय० मुखं० । ॐ ब्रह्मणे० शिरः० । ॐ विष्णवे नमः सर्वाङ्गं पूजयामि । विशेषोपहारादिकं समर्प्य ॥

लक्षवर्तिवाक्यं, प्रज्वाल्य सुवर्णप्रतिमां निधाय सङ्कल्पः—हरिःॐतत्सदिति अमुकगोत्रप्रवराया अमुकनाम्नो देव्या मम समस्तजन्म-बाल्य-यौवन-वार्द्धक्यावस्थोपार्जित-कायिक-वाचिक-मानसिक-सांसर्गिक सकलपापक्षयपूर्वक-पूर्वजन्मन्येतज्जन्मनि रजोऽवस्थायां ज्ञानतोऽज्ञानतो वा भ्रमात् कामाल्लोभाद्वा वा बाल्ये यौवने वार्धके स्वकीयपतिबन्धुपरिवारान् वञ्चयित्वा भाण्डाद्युपस्करस्पर्शनदेवपैतृक-

कर्मणि पाकक्रियालोपकृतैतच्छरीरोत्पन्न-बालवैधव्यमृतापत्यापुत्रत्वादिसकलकिल्बिषनिरसनार्थं श्रुति-स्मृति-निगमागम-पुराणोक्तफलावाप्तये ऐहिकानेकविघ्ननिरवधिमंगानुभवानन्तरं श्रीपरमेश्वरप्रीतये घृताक्तान् वा तिलतैलाक्तान् प्रज्वालितान् लक्षसंख्याकवर्तिकान् वह्निदैवतान् सुपूजितान् अमुकदेवताप्रीतये समुत्सृजे ॥

विप्राय वेदविदुषे श्रोत्रियाय कुटुम्बिने। तारकोत्तारणार्थाय अच्युताय नमाम्यहम् ॥

कांस्यपात्र-रौप्यपात्रस्थ-हेमवर्तिकादानम्—

रौप्यपात्रस्थितं दीपं हेमवर्तिसमन्वितम्। कांस्यपात्रेण सहितं ददामि व्रतपूर्तये ॥

ततो गोदानं, पूर्णपात्रदानं, भूयसी दक्षिणादानम् ॥

इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं सम्पूर्णतां यातु प्रसादात्तव केशव ॥

गृहीतोऽस्मि व्रतं देव यथापूर्णोऽस्मि यान्यहम्। तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ॥

यस्य स्मृत्येति, कायेनवाचेत्यादिना परमेश्वरं समर्प्य, विसर्जनं कुर्यात्। इति लक्षवर्तिका दीपदानविधिः ॥

१—पृथक् देवताराधनपक्षे ब्रह्मणे-विष्णवे-ईश्वराय-देव्यै-शक्त्यै-सूर्याय-गणपतये समर्पयामीति वाक्यं नियोज्य समर्पयेत्।

सत्यदुर्गापूजाविधिः

आचम्य कर्मपात्रं कुर्यात् ॥ कुशत्रयसहितं कर्मपात्रोदकमादाय—

ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥

ॐ अद्येत्यादि देशकालादीन् संकीर्त्य ममेह जन्मनि सत्यदुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वक-दीर्घायुर्विपुलपुत्र-पौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मी-कीर्ति-लाभापराजयसकलरोगक्षय-सकलमनोगतसिद्ध्यर्थमर्थ-धर्म-काम-मोक्षादिप्राप्त्यर्थं श्रीसत्यदुर्गापूजनमहं करिष्ये ॥

ॐ नमोऽस्त्वनन्तायेति दीपं सम्पूज्य। ॐ भूरसीत्यादि कलशं पूजयेत्। ॐ गणानान्त्वेति गणपतिं पूजयेत् धूपं दीपं च कुर्यात्। ॐ विघ्नेश्वरायेति प्रार्थयेत् ॥ अष्टदलेषु पूर्वादिक्रमेण पूजयेत् ॥ पूर्वे ॐ जयायै नमः। आग्नेये ॐ विजयायै नमः। दक्षिणे ॐ अजितायै नमः। नैर्ऋत्ये ॐ अपराजितायै नमः। पश्चिमे ॐ नित्यायै नमः। वायव्ये ॐ विलासिन्यै नमः। उत्तरे ॐ मङ्गलायै नमः। ईशाने ॐ अघोरायै नमः। पुनः पूर्वादिक्रमेण—ॐ जयन्त्यै नमः। ॐ मङ्गलायै नमः। ॐ काल्यै नमः। ॐ